ASTHMA



Keep yourself away from smoke



Take spices free diet at regular hours.

1

Take medicines as per your Physician's directions.

9



Avoid Overeating, fried and fatty food.

SYSTOPIC

In The Service Of ASTHMA PATIENTS

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vadika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

॥ श्रीः ॥

बालसंस्कृतपाठमाला

Bala Samskrutha Pathamala

Part 5

Class VII & VIII

COMPILED AND AUTHORED BY

Vidwan K. JAGANNATHAN

P. G. T. in Sanakrit

K. PARTHASARATHY

Vyakarana Siromani, Sikshasastri.

Samskrutha Vidya Kendram

SALEM

1993

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

FOREWORD

Samskrutha Vidya Kendram is publishing this book in Sanskrit for classes VII and VIII. The response is quite encouraging from the schools for the purchase of books published by us.

We request our well-wishers to encourage Sanskrit learning in all Schools both private and state-aided during school hours or outside school hours.

If our publications are useful and serve the purpose for which they are intended, we will be happy.

We are grateful to Mrs. V. Bhanumathi, Mr. S. Sekar, Mr. S. Vara dharajan and other Sanskrit Pandits who invaluably contributed to bringout this books for classes VII and VIII.

Yours ever in the service of Sanskrit.

R. Venkatarama Joysiyar,
Chairman,
Samaskrutha Vidya Kendram,
SALEM.
Tamilnadu State,

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

॥ श्रीः ॥

प्रार्थना

PRAYER

रामाय रामभद्राय रामचन्द्राय वेदसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

— श्रीरामस्तुतिः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अनुक्रमणिका

CONTENTS

Class VII

१	जगद्गुरुः शङ्करः	१
२	पुस्तकालयः	३
३	भरतः	५
४	पर्वतः	७
५	इक्षुः	९
६	शरीरस्य अङ्गानि	११
७	जीवाः	१५
८	संस्कृत भाषा	१७
९	ऋतु वसन्तः	१९
१०	महाकवि काळिदासः	२१
११	स्त्री शिक्षा	२३
१२	आर्य भट्ट	२६
	विलोभ पदानि	२८

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

१. जगद्गुरुः शङ्करः

Word Meaning :

1. जगद्गुरुः — World Teacher
2. पूर्णा — River purna
3. जन्म — birth
4. अलभत — got
5. पालनम् — protect
6. परिव्राजकः — monk
7. महान् उपकारः — great help
8. बहूनि — many
9. परिभ्रमन् — wandering
10. वयः — age

अस्ति केरले कालटि नामको ग्रामः। स च पूर्णा नदी तीरे वर्तते। जगद्गुरुः श्री शङ्कराचार्यः तस्मिन् ग्रामे जन्म अलभत। अस्य पिता शिव गुरुः, माता आर्याम्बा च आस्ताम्। शङ्करस्य जन्मनः प्रागेव पिता दिवङ्गतः। मातैव पुत्रं पोषितवती। यथा कालं पठनाय गुरुकुलं अगच्छत्। जन्मनैव प्रतिभा संपन्नः श्री शङ्करः शीघ्रमेव विद्यां अधीतवान्।

विरचित पूर्णः श्री शङ्करः लौकिक जीवनं नैच्छत्। मातृ सकाशात् अनुमतिं प्राप्य संन्यास-आश्रमं स्वीकृतवान् काशी नगरं गत्वा गोविन्द पादात् वेदान्त विद्यां अधीतवान्।

इत्थं श्री शङ्करः उपनिषद्ब्रह्मसूत्रं श्रीमद्भगवद्गीता इत्यादि विषये भाष्यं कृतवान्। अद्वैत प्रचाराय, चतुरः मठान् स्थापयामास। श्रीशङ्करभगवत्पाद विरचित भजगोविन्दं अति प्रसिद्धं अस्ति।

Questions :

१. कालटि नाम ग्रामः कुत्र वर्तते?
२. श्री शङ्करस्य पितरौ कौ आस्ताम्?
३. कुत्र गत्वा वेदान्तविद्यां अधीतवान्?
४. श्रीशङ्करः अद्वैत प्रचाराय किं अकरोत्?

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Fill in the blanks :

१. शङ्करस्य जन्मनः प्रागेव ... ... दिवङ्गतः

२. मातैव पुत्रस्य ... ... आसीत्

३. यथाकालं पठनाय ... .. अगच्छत् ।

४. विरचितपूर्णः श्रीशङ्करः ... जीवनं नैच्छत् ।

Translate into English :

१. अहं अपि काव्यं कर्तुं इच्छामि

२. हरिः सर्वान् पालयति ।

३. ऋषयः आश्रमेषु निवसन्ति ।

४. यतयः उपदेशं कुर्वन्ति ।

५. सारथिः रथं आनयति ।

६. ऋषीणां आश्रमाः वनानि भूषयन्ति ।

७. शीतेन जलेनैव स्नानं कर्तव्यम्

८. श्रेष्ठ व्यायामः सूर्य नमस्कारः ।

९. सूर्यः रश्मिभिः अन्धकारं नाशयति ।

१०. उदधेः जलं क्षारम् ।

Translate into Sanskrit :

1. I read in Sunlight
2. Where do the hermits stay ?
3. Where are you?
4. I shall go to forest
5. The sun shines in the sky
6. I do not forgive
7. Children play
8. I go to school
9. Ramesh does not wash clothes everyday.
10. Father protects the son

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सन्धिः —

१. हिम + अचलः = हिमाचलः

२. तत्र + अस्ति = तत्रास्ति

३. मुर + अरिः = मुरारिः

४. दैत्य + अरिः = दैत्यारिः

५. परम + आनन्दः = परमानन्दः

Verbs : (Present tense)

१. भवति २. धावति ३. लिखति

२. पुस्तकालयः

Word meaning :

1. पुस्तकालयः — Library
2. छात्राः — students
3. वाचनालयः — reading room
4. समाचार पत्राणि — News Papers
5. पृथक् — seperate
6. कथा पुस्तकानि — story-books
7. यच्छति — gives
8. आनयति — brings
9. चतस्रः — four
10. विविधानि — different

मम विद्यालये रम्यः पुस्तकालयः अस्ति। छात्राः प्रतिदिनं प्रातः सायञ्च अत्र आगच्छन्ति, पुस्तकानि पठन्ति च। अहं मित्रैः सह पुस्तकालयं गच्छामि। तत्र पृथक् वाचनालयः अपि अस्ति। वाचनालये छात्राः समाचार पत्राणि पठन्ति।

पुस्तकालये चतसृषु भाषासु पुस्तकानि सन्ति। अपि च कथा पुस्तकानि, नीति शास्त्र पुस्तकानि, इति विविध रूपेण सन्ति। छात्राः पुस्तकालय द्वारा सामान्य ज्ञानं प्राप्नुवन्ति।

Questions :

१. तव विद्यालये पुस्तकालयः कथं अस्ति ?

२. त्वं मित्रैः सह कुत्र गच्छसि ?

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

३. वाचनालये छात्राः किं कुर्वन्ति ?

४. छात्राः सामान्य ज्ञानं कथं प्राप्नुवन्ति ?

Fill in the blanks:

१. छात्राः पुस्तकालय द्वारा ... . ज्ञानं प्राप्नुवन्ति ।

२. वाचनालये छात्राः ... ... पत्राणि पठन्ति ।

३. अहं ... ... सह पुस्तकालयं गच्छामि ।

Translate into English:

१. वसिष्ठ समीपे बहवः धेनवः आसन् ।

२. मम गृहे एका धेनुः अस्ति ।

३. सा प्रतिष्ठितं दुग्धं ददाति ।

४. धेनोः चत्वारः पादाः सन्ति ।

५. वानराः फलानि खादन्ति ।

अपि च प्रायशः सर्वेषां विषयाणां आकरः पुस्तकमेव । अस्माकं विद्यालये हिन्दी, संस्कृत द्राविड, आङ्गिल भाषाणां, साप्ताहिक, पाक्षिक मासिक पत्रिकाः अपि आगच्छन्ति । किं च संस्कृते अपि, सुधर्मा, लोक-संस्कृतं, संस्कृतरत्नाकरः इत्यपि पत्रिकापि सन्ति । पुस्तकानि एव अस्माकं मित्राणि भवन्ति पुस्तकानि विनाजीवनं निरर्थकं भवति । यः अधिकं पुस्तकं पठति स एव बुद्धिमान् भवति ।

पुस्तकालये बहवो भेदाः सन्ति । केन्द्र पुस्तकालयः, विद्यालीय पुस्तकालयः चलन पुस्तकालयः इति च । "पुस्तकं ज्ञान मञ्जूषा"

६. कालः आकाशे डयते ।

७. मार्जारः क्षीरं पिबति ।

८. नारिकेळजलं मधुरं भवति ।

९. अहं आपणं गच्छामि ।

१०. बालकः पुस्तकं पठति ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Translate into Sanskrit :

1. In India people worship cow.
2. Cow eats grass.
3. Cow's milk is sweet.
4. Cow is a very useful animal.
5. We bow to the cow.
6. He gets famous.
7. Are you satisfied ?
8. Father loves son.
9. The servants protect the king.
10. That king is very powerful.

सन्धिः --

१. मुनि + इन्द्रः = मुनीन्द्रः २. रवि + इन्द्रः = रवीन्द्रः

३. हरि + ईशः = हरीशः ४. गिरि + ईशः = गिरीशः

Verbs : (Present tense)

१. पश्यति २. खादति ३. चलति शब्दः — "देवः"

३. भरतः

Word meaning :

1. महर्षिः — saint
2. उपयेमे — married
3. उवास — was
4. प्राप — got
5. चकार — did
6. चिक्रीड — played
7. वनं — forest
8. व्यवह्रियते — being called

पुरा दुष्यन्तः इति कश्चित् राजा आसीत् । सः कदाचित् मृगयार्थं वनं जगाम । सः कण्वमहर्षेः आश्रमं ययौ । तत्र शकुन्तला नाम कन्यां चकमे । विधिवशात् दुष्यन्तः शकुन्तलां तिरश्चकार ।

सा मरीच महर्षेः आश्रमे उवास । दशमे मासे चक्रवर्ति लक्षण गुणोपेतं कुमारं सुषवे । महर्षिः सर्वदमन इति तस्य नाम चकार । स बाल्ये सिंह

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शिशुभिः चिक्रीड सः धर्मेण राज्यं बभार। अतः भरतः इति नाम भेजे। तेन सुरक्षितत्वात् अयं देशः भारत देशः, भारत वर्षः, भरत खण्डः इति च अद्यापि व्यवह्रियते।

Questions:

१. भरतस्य माता का?

२. भरतस्य पिता कः?

३. सिंहः शिशुभिः सहः कः चिक्रीड?

Fill in the blanks:

१. तत्र शकुन्तला नाम ... ... चकमे।

२. सः धर्मेणराज्यं ... ...।

३. सः मृग यार्थं ... ... जगाम।

४. अतः भरतः इति .... भेजे।

Translate into English:

१. विप्राः वनं गच्छन्ति।

२. पान्थाः ग्रामान्तरं गच्छन्ति।

३. रथः मार्गे वेगेन धावति।

४. ऋषीणां आश्रमेषु प्रणामः कर्तव्यः।

५. भूपः राज्यं पालयति।

६. कुम्भकारः घटं करोति।

७. विश्वामित्रः अयोध्यां अगच्छत्।

८. अहं अस्मिन् गृहे निवसामि।

९. सः जलं अपिबत्।

१०. तव पिता कुत्र अस्ति?

Translate into Sanskrit:

1. There is a forest.
2. It is very big.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

3. Lion is the king of forest.
4. Therefore he is called Vanaraja.
5. Lion eats flesh.
6. He drinks water with tongue.
7. A King sits on an elephant.
8. Elephant does not eat meat.
9. Elephant walks slowly.
10. Camels walk in desert

सन्धिः

१. मधु + अरिः = मध्वरिः २. सु + आगतम् = स्वागतम्
३. भू + आदि = भ्वादि ४. वधू + आननम् = वध्वाननम्

Verbs: (भविष्यत्कालः)

१. भविष्यति २. लेखिष्यति ३. पास्यति

४. पर्वतः

Word Meaning :

1. पर्वतः — mountain
2. वृक्षाः — Trees
3. पाषाणः — Stone
4. गुहाः — caves
5. सिंहः — Lion
6. व्याघ्रः — Tiger
7. हरिणः — deer
8. सारमेयः — dog
9. जन्तवः — animals
10. व्याधः — hunter

अयं पर्वतः । अस्मिन् पर्वते बहवः वृक्षाः बहवः पाषाणाः च सन्ति-पाषाणानां पार्श्वभागे अपि वृक्षाः रोहन्ति । वृक्षाः केचित् ह्रस्वाः, केचित् उन्नताः । वर्तन्ते । केषांचन वृक्षाणां फलानि मधुराणि, केषांचन फलानि आम्लानि च वर्तन्ते ।

अस्मिन् पर्वते गुहाः विद्यन्ते । तासु गुहासु सिंहाः, व्याघ्राः । भल्लूकाः च दिवा वसन्ति । रात्रौ ते क्रूरमृगाः बहिः आगच्छन्ति इतस्ततः चरन्ति, भक्षयन्ति च क्षुद्रान् मृगान् । अस्मिन् गिरौ हरिणः तिष्ठति । व्याधाः सारमेय साहायेन

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

हरिणान् गृह्णन्ति। हरिणाः सौम्याः जन्तवः। पुरा महर्षयः आश्रमेषु हरिणान् रक्षन्ति स्म।

Questions:

१. सिंहादयः कुत्र निवसन्ति?
२. अरण्ये के के मृगाः निवसन्ति?
३. हरिणः कीदृशः मृगः?
४. केन साहाय्येन व्याधाःहरिणान् गृह्णन्ति?

Fill in the blanks:

१. अस्मिन् पर्वते बहवः ... ... सन्ति
२. अस्मिन् पर्वते ... ... विद्यन्ते।
३. हरिणाः ....।
४. पुरा महर्षयः आश्रमेषु ... .. रक्षन्ति स्म।

Translate into English:

१. एतत् कस्य गृहं वर्तते?
२. अस्मिन् गेहे के निवसन्ति।
३. एतत् राम कृष्णस्य गृहं अस्ति।
४. सदाशिव महाशयः आंगिल महाविद्यालये प्राध्यापकः अस्ति।
५. सः तत्र साहित्य विषयं अध्यापयति।
६. सः न कदापि छात्रेभ्यः क्रुध्यति।
७. अहं धनं इच्छामि।
८. सः पाषाणं क्षिपति।
९. शिक्षकः बालकं प्रश्नं पृच्छति।
१०. अहं उष्णं स्पृशामि।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Translate into Sanskrit:

1. I am glad to-day.
2. Indeed-all are glad to-day.
3. Will you go to the forest for hunting?
4. The city is very big.
5. There are many rivers in India.
6. The water of the river is sweet.
7. Who is sitting on the bank of the river.
8. Why are you sad?
9. Whose ring is that?
10. Krishna is decorating the body.

सन्धिः—

१. सुर + इन्द्रः = सुरेन्द्रः २. देव + इच्छा = देवेच्छा

३. देव + ईशः = देवेशः ४. महा + इन्द्रः = महेन्द्रः

Verbs: (भविष्यतकालः)

१. चलिष्यति २. स्थास्यति ३. द्रक्ष्यति

५. इक्षुः

Word Meaning:

1. कटाहः — A shallow boiler
2. शोषयति — makes dry
3. कार्मिकः — worker
4. शर्करा — sugar
5. इक्षुः — Sugar-cane
6. वंशः — bamboo
7. मधुरः — sweet
8. वर्णः — colour
9. उन्नतिः — high
10. मृदुः — soft

चित्रं पश्य। इदं इक्षु क्षेत्रम्। इक्षुः उन्नत तया वर्धते। इक्षुं निपीड्य रसं संपादयन्ति। इक्षु रसः अतीव मधुरः। इक्षु रसं कटाहे निक्षिप्य अग्निना शोषयन्ति तत् गुडं भवति।

2.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इक्षौ द्वौ विभागौ स्तः। कश्चित् श्वेतवर्णः, केचित् कृष्णवर्णः च अस्ति। अस्मद्देशे बहवः शर्करालयाः सन्ति। शर्करालयेषु सहस्राधिकाः कार्मिकाः कर्म कुर्वन्ति।

वम्शः अपि इक्षुः इव उन्नत तया वर्धते। वम्शः गृहनिर्माणाय उपयुज्यते वम्शः कठिनः। इक्षुः मृदुः। बालाः इक्षुं दम्क्ष्ट्वा रसं पिबन्ति। अहं इक्षुं भक्षयामि।

Questions:

१. इक्षुः कथं वर्तते?
२- इक्षुरसः कीदृशः?
३. वम्शः कथं वर्धते?
४. इक्षु रसं कटाहे निक्षिप्य किं कुर्वन्ति?

Fill it:

१. इक्षौ ... ... विभागौ स्तः।
२. इक्षु रसः अतीव ... ... भवति।
३. अस्मद्देशे बहवः ... ... सन्ति।
४. इदं ... . क्षेत्रम्।

Translate into English:

१. एषा मदीया कङ्कतिका।
२. त्वदीयं ग्रैवेयकं शोभनं अस्ति।
३. नूपुराणां ध्वनिः मधुरः भवति।
४. आपृच्छय गन्तव्यम्।
५. भिक्षुकः मौदकैः उदरं पूरयति
६. सर्वान् धर्मान् परित्यज्य श्री कृष्णं भज।
७. छात्राः पुस्तकानि आदाय विद्यालयं गच्छन्ति
८. सः कृषीवलः अस्ति।
९. रामः आम्र वृक्षं जलेन सिञ्चति।
१०. मेघा आकाशात् जलं विमुञ्चन्ति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Translate into Sanskrit

1. Whose axe is this?
2. What do you do in your house?
3. The farmer is watering the field.
4. I know everything.
5. You do not know anything.
6. I have no necklacc.
7. There is no pain on his head.
8. Where is the fruit shop.
9. I want some ghee.
10. Here is no fruit shop.

सन्धिः —

१. चन्द्र + उदयः = चन्द्रोदयः २. जल + ऊर्मिः = जलोर्मिः

३. महा + उदधिः = महोदधिः ४. विद्या + उपदेशः = विद्योपदेशः

Verbs: (भूतकालः)

१. अभवत् २. अधावत् ३. अलिखत्

६. शरीरस्य अंगानि

Word Meanings

1. शरीरम् — body
2. अंगानि — parts
3. शिरः — head
4. कण्ठः — neck
5. हस्तः — hand
6. जिह्वा — tongue
7. दन्तः — tooth
8. उदरः — stomach
9. अङ्गुली — finger
10. पादः — foot
11. कर्णः — ear

नरस्य शरीरे बहूनि अंगानि सन्ति। अंगानि अतीव प्रयोजनानि सन्ति। मनुष्यः विना अङ्गं किमपि कर्तुं न शक्नोति। शरीरे, शिरः, नेत्रं, कर्णः, दन्तः जिह्वा, कण्ठः, हस्तः, अंगुली, पादः च इति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नेत्राभ्यां वयं पश्यामः। कर्णाभ्यां शृणुमः। जिह्वया रसं जानीमः। नासिकया गन्धं जिघ्रामः। हस्तेन लिखामः, खादामः च। पादेन चलामः। इत्थं शरीरे अंगानि अस्माकं जीवने अत्यधिकं मुख्यं स्थानं वहति। "सर्वस्य गात्रस्य शिरः प्रधानम्" शिरः विना कोपि जीवितुं न शक्नोति।

Questions:

१. शरीरे कानि अंगानि सन्ति?

२. नेत्राभ्यां किं कुर्मः?

३. कर्णाभ्यां किं कुर्मः?

४. नासिकया किं कुर्मः?

Fill in the blanks:

१. नरस्य शरीरे .... अंगानि सन्ति।

२. सर्वस्य गात्रस्य ... ... प्रधानम्।

३. पादेन ... ...।

४. जिह्वया रसः .. ...।

Translate into English:

१. बालक, किं नामधेयं तव?

२. गोविन्द इति नामधेयं मम।

३. त्वं कुत्र निवससि?

४. अहं अस्मिन् गृहे एव निवसामि।

५. तव गृहे के के निवसन्ति?

६. मम गृहे मम माता, पिता, भ्राता च निवसन्ति।

७. किं करोति तव भ्राता?

८. तव पिता कुत्र अस्ति?

९. मम पिता उद्यानेपुस्तकं पठति।

१०. तव माता किं करोति?

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Translate into Sanskrit :

1. Who goes ahead ?
2. Will you not go ahead ?
3. He sits on a deer skin ?
4. Deers are running in the ashrama of the sages.
5. I shall come some other day.
6. Boys are running in the playground
7. Teacher teach the lesson.
8. I read in sun light.
9. I want to eat dinner.
10. I eat fruits.

सन्धिः —

१. मम + एव = ममैव
२. देव + ऐश्वर्यं = देवैश्वर्यम्
३. तथा + एव = तथैव
४. वन + औषधिः = वनौषधिः
५. अत्र + एकदा = अत्रैकदा

Verbs : (भूतकालः)

१. अवदत् २. अभवत् ३. अधावत् "लङ् शब्दः पुंलिङ्गः

Sloka :

मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्व भूतेषु यःपश्यति सः पश्यति ॥ १ ॥

यौवनं धन संपत्तिः प्रभुत्वं अविवेकता ।
एकैकमपि अनर्थाय किमु यत्र चतुष्टयम् ॥ २ ॥

दधि मधुरं मधु मधुरं द्राक्षा मधुरा सुधापि मधुरैव ।
तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम् ॥ ३ ॥

काव्य शास्त्र विनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खानां निद्रया कलहेन वा ॥ ४ ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रियवाक्य प्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्माद् तदेव वक्रतव्यं वचने का दरिद्रता ।। ५ ।।

सर्व धर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहंत्वा सर्व पापेभ्यो मोक्षयिष्यामि मा शुचः ।। ६ ।।

Proverbs :

१. न क्वापि सरलेन पदं निधीयते ।
२. न निश्चितार्थात् विरमन्ति धीराः ।
३. नास्ति गतिश्रमो यानवताम् ।
४. नास्ति अर्थिनो गौरवम् ।
५. निम्बफलानि काकैः भुज्यन्ते ।
६. न समुद्रतलं अस्पृष्ट्वा नरो विन्दति मौक्तिकम् ।
७. न चागतं सुखं त्यजेत् ।
८. न दुर्जनो जातु जहाति दुर्गुणम् ।
९. गुणैः विहीनाः बहु जल्पयन्ति ।
१०. गतानुगतिको लोकः ।

Sloka :

कविः करोति काव्यानि रसं जानाति पण्डितः ।
तरुः सृजति पुष्पाणि मरुत् वहति सौरभम् ।। ७ ।।

तक्षकस्य विषं दन्ते मक्षिकायाश्च मस्तके ।
वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जनस्य हि ।। ८ ।।

छायां अन्यस्य कुर्वन्ति तिष्ठन्ति स्वयं आतपे ।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ।। ९ ।।

स्थान भ्रष्टाः न शोभन्ते दन्ताः केशाः नखाः नराः ।
इति सञ्चिन्त्य मतिमान् स्वस्थानं न परित्यजेत् ।। १० ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

उपकारोपि नीचानां अपकाराय प्रकल्पते ।
पयः पानं भुजङ्गानां केवलं विषवर्धनम् ॥ ११ ॥

यथा परोपकारेषु नित्यं जागर्ति सज्जनः ।
तथा परोपकारेषु नित्यं जागर्ति दुर्जनः ॥ १२ ॥

Proverbs :

१. अङ्गीकृतं सुकृतिनः न परित्यजन्ति ।
२. जलबिन्दु निपातेन क्रमशः पूर्यते घटः ।
३. अग्निः हिमस्य भेषजम् ।
४. अशक्तोऽहं गृहारम्भे शक्तोऽहं गृहभञ्जने ।
५. अपन्थानं तु गच्छन्तं सोदरोपि न विमुञ्चति ।

७. जीवाः

Word Meaning :

1. पृष्ठम् — back
2. वेगः — speed
3. मस्तकः — head
4. विषं — poison
5. क्षुद्रं — small
6. वन्यः — wild
7. दूरम् — away
8. विना — without

एषः मयूरः अस्ति ! सः अतीव मनोहरः अस्ति । सः मधुराणि निफल खादति । सः वर्षकाले आनन्देन नृत्यति । जनाः मयूरं पश्यन्ति । हर्षन्ति च । सः उद्याने वसति । वने अपि वसति । सः वृक्षे उपविशति ।

एषः अश्वः अस्ति । जनाः अश्वस्य पृष्टे उपविशन्ति । अश्वः तीव्रेण वेगेन धावति । अश्वः घासः खादति । सः शकटं वहति । जनाः अश्वेन ग्रामात् ग्रामं गच्छन्ति ।

एषः मत्स्यः अस्ति । सः सर्वदा जले वसति । जलं विना सः न कदापि जीवति । मत्स्याः जलं शुद्धं कुर्वन्ति ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एषः सिंहः अस्ति । सः वन्यः जीवः अस्ति । सः वने वसति । सः वनस्य नृपः अस्ति । वन जीवान् खादन्ति । यदा सः जर्जति तदा वनस्य जीवाः दूरं धावन्ति ।

एषः भुजङ्गः अस्ति । भुजङ्गस्य मस्तके विषं अस्ति : सः दशति । जनाः भुजङ्गात् बिभ्यति । सः (वल्मीके) वसति । सः क्षुद्रान् खादति ।

Answer the following :

१. मयूरः कानि खादन्ति ?
२. अश्वः किं खादति ?
३. मत्स्यः कुत्र वसति ?
४. भुजङ्गः कुत्र वसति ?

Fill in the blanks :

१. मयूरः अतीव ... . अस्ति ।
२. अश्वः तीव्रेण ... ... धावति ।
३. भुजङ्गस्य ... ... विषं अस्ति ।
४. ... ... विना मीनः न जीवति

Fill it :

१. जनाः ... ... ।
२. एषः ... ... अस्ति ।
३. सः ... ... जीवः अस्ति ।
४. सः ... ... जीवान् खादति ।

Translate into English :

१. सूचकः वस्त्राणि सीव्यति ।
२. रजकः वस्त्राणि प्रक्षालयति ।
३. तन्तुवायः वस्त्राणि वयति ।
४. चर्मकारः पादत्राणं करोति ।
५. कुम्भकारः घटं करोति । वैमानिकः विमाने चालयति ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

६. मालाकारः मालां सृजति ।

७. स्वर्णकारः आभरणानि करोति ।

८. लेखकः कथां लिखति ।

९. शिक्षकः पाठं बोधयति ।

१०. पत्रवाहकः पत्रं आनयति ।

Translate into Sanskrit :

1. Come to school in time.
2. Come to school with perfect uniform.
3. Move in Line.
4. Avoid noise.
5. Bring the books daily.
6. Do homeworks regularly
7. Obey your elders.
8. Take part in activities
9. Play in the playground.
10. Help your friend

सन्धिः

१. गण + इन्द्रः = गणेन्द्रः

२. राज + इन्द्रः = राजेन्द्रः

३. महा + ईशः = महेशः

८. संस्कृत भाषा

Word Meaning :

1. प्रभूताः — many
2. जननी — mother
3. संस्कृत शब्दाः — Sanskrit words
4. तुल्या — equal
5. महाकविः — Great poet
6. रक्षणं — to protect
7. प्राचीनं — ancient
8. अमरवाणी — ornaments

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भारते प्रभूताः भाषाः विद्यन्ते। प्रायः तासां भाषाणां जननी संस्कृतं एव अस्ति। अतः अस्माकं भाषासु बहवः संस्कृत शब्दाः सन्ति। देवानां अपि सा एव भाषा। अतः तां देववाणी इति अपि वदामः। आर्याः संस्कृतेनैव व्यवहरन्ति स्म। संस्कृतेन तुल्या प्राचीन भाषा न अस्ति। संस्कृतं अतीव मधुरं सुलभं गम्भीरं च अस्ति।

भूतले अति प्राचीनं वाङ्मयं वेदाः ते संस्कृते एव वर्तन्ते। ज्योतिषं आयुर्वेदः, धर्मशास्त्रं, भारतं, रामायणं इति सर्वं देववाण्यां एव वर्तते। कालिदासादीनां महा कवीनां महाकाव्यानि नाटकानि च अमरवाण्यां एव। किं बहुना? आर्याणां सर्वं साहित्यं संस्कृतमयमेव।

संस्कृतस्य रक्षणं एव भारतीय संस्कृतेः रक्षणम्। संस्कृतस्य उत्कर्षः एव भारतीय भाषाणां उत्कर्षः। तेनैव भारतीयानां ऐश्वर्यं सिध्यति। अतः सर्वदा संस्कृतस्य अध्ययनं आवश्यकम्।

Answer the following:

१. कुत्र प्रभूताः भाषाः विद्यन्ते?

२. सर्वासां भाषाणां जननी का भाषा?

३. भूतले अति प्राचीनवाङ्मयं किम्?

Fill it:

१. संस्कृतेन ... ... प्राचीन भाषा न अस्ति।

२. अस्माकं भाषासु बहवः ... ... सन्ति।

३. संस्कृतस्य रक्षणं एव ... ... रक्षणम्।

Translate into English:

१. सः हस्तेन कार्यं करोति।

२. कपेः लीलया बालाः रमन्ते।

३. भगवन्नाम स्मरणेन पापः नश्यति।

४. रामेण रावणः हतः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

५. सः परिश्रमेण साफल्यं लभते ।

६. औषधिना रोगः शाम्यति ।

७. सः मित्रेण सह विद्यालयं गच्छति ।

८. रामः सीतया सह वनं गतः ।

९. अभ्यासेन विना कार्यं कठिनं भवति ।

१०. जलं विना मत्स्यः न जीवति ।

Translate into Sanskrit :

1. Sky is blue.
2. Grass is green.
3. Crow is black.
4. Blood is red.
5. Milk is white.
6. Lemon is yellow.
7. Elephant is grey.
8. Leaves are green.
9. Tomoto is red.
10. Honey is sweet.

सन्धिः—

१. सूर्य + उदयः = सूर्योदयः

२. एकेन + अपि = एकेनापि

३. न + अयं = नायं

९' ऋतु वसन्तः

Word Meaning :

1. स्वागतम् — Welcome
2. पुष्पाकरः — spring season
3. सौरभम् — good smell
4. विमलम् — pure
5. वारि — water
6. पङ्कजम् — Lotus
7. शोभा — shine beauty
8. नानावर्णानि — different colours

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

समागतः वसन्तः। स्वागतं ते ऋतु राज। त्वमेव पुष्पाकरः। तव आगमनेन भवति पुष्पाणां विकासकः, सौरभानां च प्रसारः। अतः एव तव आगमनं सर्वान् आनन्दयति।

पश्यतु निर्मलं आकाशम्। स्वच्छाः दिशाः, प्रसन्नाः इव भान्ति। सर्वत्र तडागेषु नदीषु कुल्यासु सरसु च राजते विमलं वारि। विकसितानां पङ्कजानां शोभा सर्वेषां मनः रञ्जयति।

वनेषु, उद्यानेषु च नाना वर्णानि पुष्पाणि नयनं आनन्दयति। भ्रमराः पुष्पोपरिस्थित्वा मधुरं शब्दं कुर्वन्ति। पक्षिणां शब्दं अपि सर्वेषां हृदये आनन्दं जनयति। रम्यं एतत् वसन्त ऋतुः। वसन्त ऋतुः सर्वोन्नत ऋतुः इति कथ्यते महाकवि कालिदासेन उक्तं "सर्वे सरवे चारुतरं वसन्ते" भारते प्रायशः सर्वेषु, ऋतुषु, एकः महान् उत्सवः भवति। अस्मिन् ऋतौ होलिका महोत्सवोपि प्रचलति।

Answer the following :

१. वसन्त ऋतोः अपरं नाम किम्?
२. वसन्त ऋतोः आगमनं जनान् किं करोति?
३. विमलं वारि कुत्र वर्तते?
४. कालिदासेन किं उक्तम्?

Translate into English :

१. देवः भक्ताय वरं ददाति।
२. धनिकः भिक्षुकाय धनं ददाति।
३. इन्धनाय दासः वृक्षं कृन्तति।
४. जनकः पुत्राय कुप्यति।
५. वीरः युद्धाय गच्छति।
६. आचार्यः शिष्येभ्यः पुस्तकानि यच्छति।
७. देशाय वीरः गृहं त्यजति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

८. रामः कवये फलानि आनयति ।

९. शिक्षकः बालिकायै सङ्गीतं बोधयति ।

१०. महिळायै पुष्पं रोचते ।

Translate into Sanskrit:

1. My school is big
2. My House is small
3. Palm tree is tall
4. Banana tree is short.
5. More water is in the ocean.
6. Less water is in the pond.
7. His pen is new.
8. My pencil is old.
9. Beema is stout.
10. Kuchela is thin.

सन्धिः

१. इति + उक्त्वा = इत्युक्त्वा

२. षड् + आननः = षडाननः

३. शनैः + अन्तः = शनैरन्तः

१०. महाकवि काळिदासः

Word Meaning:

1. आदि कविः — first poet
2. तृतीयं स्थानं — third place
3. उत्तर भारतीयः — North Indian
4. जन्म स्थानं — birth place
5. अजपालकः — shepherd
6. बाल्ये — young age
7. विश्व प्रसिद्धः---world famous
8. विभिन्न — different
9. राष्ट्रकविः Nation poet
10. अद्यापि — even today

संस्कृत भाषायां आदि कविः वाल्मीकिः, व्यासः च इतिहासकवी भवतः । काळिदासः तु तृतीयस्थानं वहति । अयं काळिदासः उत्तर भारतीयः इति ज्ञायते ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अस्य जन्म स्थानं कुत्रेति न ज्ञायते। विमर्शकानां अस्य जन्म स्थाने, विभिन्न अभिप्रायाः सन्ति परं उज्जयिनी इति केचित् वदन्ति।

अयं कालिदासः, बाल्ये अजा-पालकः अभवत्। कालि देव्याः अनुग्रहेण कविता सामर्थ्यं प्राप्तवान् इति जानीमः। अस्य ग्रन्थाः रघुवम्शम् कुमार संभवं मेघदूतं माळविकाग्निमित्रं अभिज्ञान शाकुन्तलं विक्रमोर्वशीयं ऋतुसंहारं इति। अस्य कृतिषु उपमालङ्कारः एव अति प्रसिद्धः। विश्व प्रसिद्ध अभिज्ञान शाकुन्तल नाटकेन, काळिदासः, अपर भारतीय षेक्सपियर् इति वदन्ति।

अस्माकं राष्ट्र चिह्नं अशोक चक्रं, राष्ट्र पुष्पं पद्मं, राष्ट्रमृगः व्याघ्रः राष्ट्र पक्षी मयूरः, तद्वत् अस्माकं राष्ट्रकविः एव इति वक्तुं आनन्दं अनुभवामः। अद्यापि यशः कायेन, महाकविः, अस्माकं मध्ये जीवति।

Questions:

१. इतिहास कवी कौ?

२. तृतीय स्थाने कः कविः आयाति?

२. बाल्य अयं कविः कथं आसीत्?

४. काळिदासस्य कृतयः के?

५. अस्माकं राष्ट्र कविः कः?

Fill it:

१. राष्ट्र मृगः ... ... ।

२. राष्ट्र पुष्पं .... ।

३. काळिदेव्याः अनुग्रहेण ... ... सामर्थ्यं प्राप्तवान्।

४. भारतस्य राष्ट्रं चिह्नं ... ... ।

Translate into English:

१. हिमालयात् गङ्गा प्रवहति।

२. ईश्वरः नरान् दुःखात् रक्षति।

३. मुनिः वनात् गच्छति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

४. सः क्रोधात् बालं तुदति ।

५. ग्रामात् बहिः मृगालाः वसन्ति ।

६. चोरः गृहात् धनं चोरयति ।

७. साधवः नगरात् नगरं भ्रटन्ति ।

८. अलिः पुष्पात् पुष्पं भ्रमति ।

९. भग्न पात्रात् जलं स्रवति ।

१०. पृथिव्याः शोभां प्रशंसन्ति कवयः ।

Translate into Sanskrit:

1. There is a garden infront of the temple.
2. There is a well at the back of the house.
3. A monkey is on the tree.
4. A dog is under the tree.
5. There is a post office at the right side of the school.
6. There is a hospital at the left side of the park.
7. The clouds more above the mountain.
8. Wash your hands before the meals.
9. Monday comes after Sunday.
10. Do this work again.

सन्धिः —

१. कमल + आसनः = कमलासनः

२. मालविका + अग्निमित्रं = मालविकाग्निमित्रं

३. धन + अधिपः = धनाधिपः

११. स्त्री शिक्षा

प्राचीन काले स्त्री शिक्षायाः उन्नत स्थानं आसीत् । सीता, सावित्री, अरुन्धती, लीलावती इत्याद्याः महिळाः शिक्षिताः आसन् । स्त्री शिक्षणेन, स्त्री पुरुषयोः समान रूपः, समान चिन्तना, जीवने आनन्दः च भवितुमर्हति ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

परं भारत मध्यकाले एव स्त्री शिक्षणे न्यूनः अभवत् । तेनैव कारणेन आधुनिक काल पर्यन्तं स्त्रीणां स्वतन्त्र चिन्तने, कार्य करणे, च न्यूनं भवति ।

परं नवीन भारते एतादृश शोचनीया परिस्थितिः नास्ति । आङ्गिलेय आगमने न स्त्री शिक्षणं नवीनं आसीत् । स्वतन्त्र त्यागी सरोजिनी नायुडु, कमला देवी' प्रधान मन्त्री श्रीमति इन्द्रागान्धी च महिळायाः महत्वे आदर्श भूताः विराजन्ते ।

अपि च स्त्रीशिक्षणे, राजारां मोहन्राय् स्वामी दयानन्दसरस्वती स्वामी विवेकानन्दः च अत्यभिलाषयुक्ताः आसन् । तस्मात् भारतीयाः वयं स्त्रीशिक्षणे अभिरुचिं दर्शयाम. अतः सर्वैः अपि स्वकन्यां आवश्यं पाठनीयम् ।

Word Meaning:

1. प्राचीनम् — old time
2. उन्नत स्थानं — high stage
3. समान रूपः — equal stage
4. समान चिन्तना — equal thought
5. महिळा — lady
6. आधुनिक — Now a day
7. न्यूनं — less
8. भारतीयाः — Indian people
9. अभिरुचि. — taste
10. आदर्श रूपः — Example person

Questions:

१. प्राचीन भारते स्त्री शिक्षणं कथं आसीत् ?

२. स्त्री शिक्षणेन को लाभः ?

३. मध्यकाले भारते स्त्री शिक्षणं कथं आसीत् ?

४. नामानि वदत ?

५. महिळानां महत्वे आदर्शभूताः काः ?

Fill it:

१. आङ्गिलेय आगमनेन ... ... नवीनं आसीत् ।

२. मध्यकाले एव स्त्री शिक्षणे .... अभवत् ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

३. प्राचीनकाले ... ... स्थानं आसीत् ।
४. अतः सर्वैः अपि .... कन्यां अवश्यं पाठनीयम् ।

Translate into English:

१. मथुरायाः राजा उग्रसेनः ।
२. उग्रसेनस्य पुत्रः कम्सः ।
३. कम्सस्य भगिनी देवकी ।
४. देवक्याः पतिः वसुदेवः ।
५. कृष्णः यशोदायाः नन्दगोपस्य च पालित पुत्रः ।
६. दशरथस्य पौत्रः लवः ।
७. लवस्य पितृव्यः लक्ष्मणः ।
८. विनायकस्य मातुलः नारायणः ।
९. गणेशस्य मातुलानी लक्ष्मीः ।
१०. षण्मुखस्य भ्राता विनायकः ।

Translate into Sanskrit:

1. Ramesh goes to the play ground to play.
2. Kumar goes to the shop to buy a pen.
3. He goes to dance hall to dance.
4. She goes to temple to worship God.
5. He wants to become a doctor.
6. Artist gets the money having draw the picture.
7. Hema posts the letter having gone to the post office.
8. I learn many stories having read Maha Bharatha.
9. Hari worships to God having gone to the temple.
10. Become a scholar having read Sanskrit.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सन्धिः—

१. इति + आद्याः = इत्याद्याः
२. पुरुषा + उत्तमः = पुरुषोत्तमः
३. पशुः + पतिः = पशुपतिः

१२. आर्य भट्ट

Word Meaning:

1. पुराणम् — old
2. विज्ञानी — scientist
3. जननम् — birth
4. गणितशास्त्रं —
5. निपुणः —
6. संगृह्य — to collect
7. श्रेष्ठः — best
8. ग्रन्थम् — book
9. विश्वम् — world
10. विशारदः —

भारते पुराण वैज्ञानिकः आर्यभट्टः। अस्य जननं उत्तर भारते आसीत्। क्रिस्तोः जननं आरभ्य पञ्चशत वर्षात् परं अस्य कालः आसीत् इति विमर्शकाः वदन्ति अयं गणित शास्त्रे अति-निपुणः। खगोल शास्त्रे विशारदः विमर्शकः।

आर्यभट्टः अति सूक्ष्म बुद्धिमान् आसीत्। आकाशे सूर्यस्य, चन्द्रस्य इतर ग्रहस्य च संचारः इत्यादि अनेके विषयाः संगृह्य प्रकाशितः। व्यासमुनिः इव आर्यभट्टः अपि तपसा श्रेष्ठः आसीत्। आत्म शक्तिमान् इत्यपि वक्तुं शक्यते। आर्यभट्टेन विरचितं ग्रन्थं, आर्यभट्टीयं इति।

विश्वे प्रथमं, भूमिः गोलाकृतिः इति सूक्ष्मविषयं आर्यभट्टेन आविष्कृतम्। गणिते पूज्यस्य शक्तिः इदमेव इति उक्तवान्।

प्रसिद्ध नाळन्दा विश्व विद्यालये कुलपतिः आसीत् इति ज्ञायते। तस्मिन् सकाशे बहवो छात्राः गणितं ज्ञातवन्तः। अपर गणित शास्त्र विशारदः भास्करः आर्यभट्ट प्रशस्तितः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भारते आर्यभट्टं नैव विस्मरति । तस्य कृतज्ञतां प्रकाशितुकामः भारतीय वैज्ञानिकाः, १९७५ तमे वर्षे आकाशे प्रेषितस्य राकेट् नाम, आर्यभट्टः इति सूचितः ।

Questions :

१. कः पुराण भारते विज्ञानी आसीत् ?
२. कस्मिन् शास्त्रे सः निपुणः आसीत् ?
३. तस्य ग्रन्थस्य नाम किम् ?
४. भास्करः कं अधिकं प्रशस्तिः ?

Translate into English :

१. पर्वतात् निर्झराः प्रवहन्ति ।
२. नदीजलं मधुरं भवति ।
३. वायुः मन्दं वहति ।
४. शिक्षकः बालकं प्रश्नं पृच्छति ।
५. भारत देशः पुण्यभूमिः भवति ।
६. त्वं हि प्रश्नोत्तरं दातुं समर्थः ।
७. दशरथात्मजः रामः आदर्श पुरुषः भवति ।
८. दीपावलिः जनानां हृदये आनन्दं जनयति ।
९. हिरण्यस्य पुत्रः भक्तप्रह्लादः ।
१०. इन्द्रागान्धी अस्माकं प्रधान मन्त्री आसीत् ।

Translate into Sanskrit :

1. Dhasarata had four sons.
2. There are many fruits in the fruit shop.
3. The deer is the very beautiful animal.
4. The deers are running in the forest.
5. Will you go to the forest for hunting.
6. There are many beautiful houses in the city.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

7. Vyasa wrote Mahabharata.
8. The cat catches the rat.
9. I pray with folded hands.
10. The brave man fights on the battle field.

सन्धिः—

१. लोक + ईशः = लोकेशः
२. प्रति + अहं = प्रत्यहम्
३. भूयः + अपि = भूयोपि

Fill it :

१. .... इव आर्यभट्टः अपि तपसाश्रेष्ठः आसीत् ।
२. भूमिः ... ... इति सूक्ष्म विषयं आर्यभट्टेन आविष्कृतम् ।
३. प्रसिद्ध ... ... विश्व विद्यालये सः कुलपतिः आसीत् ।
४. अस्य जननं ... ... आसीत् ।

विलोम पदानि

पाठः

१.	प्रसिद्धः × अप्रसिद्धः	ग्रामः × नगरं
	पूर्णः × रिक्तः	शीघ्रं × मन्दं
२.	सह × विना	मधुरं × कटु
	प्रातः × सायं	उपकारः × अपकारः
३.	तुरा × अधुना	कदाचित् × सर्वदा
	धर्मः × अधर्मः	वेगेन × शनैः
४.	दिवा × रात्रौ	विशालः × लघु
	क्षुद्रः × वन्यः	प्रश्नं × उत्तरं
५.	उन्नतः × वामनः	अधिकः × अल्पः
	मृदु × कठिनः	अस्ति × नास्ति

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

६. प्रधानं × अप्रधानं मुख्यं × अमुख्यं
शक्यं × अशक्यं अग्रे × अन्ते

७. पुरतः × पृष्ठतः दूरे × समीपे
शुद्धः × अशुद्धः ज्येष्ठः × कनिष्ठः

८. सुलभः × कठिनः प्राचीनं × नवीनं
आवश्यकं × अनावश्यकं पापः × पुण्यः

९. एकत्र × सर्वत्र स्वच्छः × अस्वच्छः
वीरः × भीरुः नूतना × पुरातना स्थूलः × कृशः

१०. उपरि × अधः वामतः × दक्षिणतः पूर्वं × परं

११, शिक्षिताः × अशिक्षिताः, समानः × विभिन्नः
प्राचीनकालः × आधुनिककालः स्वतन्त्रः × परतन्त्रः

१२. सूक्ष्मः × स्थूलः संगृह्य × विभज्य
सुगन्धः × दुर्गन्धः स्मरति × विस्मरति

VI1 Standard

अकारान्तः पुल्लिङ्गः 'बालक' शब्दः (Boy)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	बालकः	बालकौ	बालकाः
सं प्रथमा	हे बालक	हे बालकौ	हे बालाः
द्वितीया	बालकम्	बालकौ	बालान्
तृतीया	बालकेन	बालकाभ्यां	बालकैः
चतुर्थी	बालकाय	बालकाभ्यां	बालकेभ्यः
पञ्चमी	बालकात्	बालकाभ्यां	बालकेभ्यः
षष्ठी	बालकस्य	बालकयोः	बालकानाम्
सप्तमी	बालके	बालकयोः	बालकेषु

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्

आकारान्त स्त्रीलिङ्गः 'रमा' शब्दः (Lakshmi)

रमा	रमे	रमा
हे रमे	हे रमे	हे रमाः
रमां	रमे	रमाः
रमया	रमाभ्यां	रमाभिः
रमायै	रमाभ्यां	रमाभ्यः
रमायाः	रमाभ्यां	रमाभ्यः
रमायाः	रमयोः	रमाणाम्
रमायां	रमयोः	रमासु

अकारान्तः नपुंसकलिङ्गः 'फल' शब्दः (Fruit)

फलं	फले	फलानि
हे फल	हे फले	हे फलानि
फलं	फले	फलानि
फलेन	फलाभ्यां	फलैः
फलाय	फलाभ्यां	फलेभ्यः
फलात्	फलाभ्यां	फलेभ्यः
फलस्य	फलयोः	फलानाम्
फले	फलयोः	फलेषु

इकारान्तः पुंलिङ्गः 'हरि' शब्दः (Vishnu)

हरिः	हरी	हरयः
हे हरे	हे हरी	हे हरयः
हरिं	हरी	हरीन्
हरिणा	हरिभ्यां	हरिभिः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
	हरये	हरिभ्यां	हरिभ्यः
	हरेः	हरिभ्यां	हरिभ्यः
	हरेः	हर्योः	हरीणाम्
	हरौ	हर्योः	हरिषु

उकारान्तः स्त्रीलिङ्गः 'धेनु' शब्दः (Cow)

धेनुः	धेनू	धेनवः
हे धेनो	हे धेनू	हे धेनवः
धेनुम्	धेनू	धेनूः
धेन्वा	धेनुभ्यां	धेनुभिः
धेन्वै - धेनवे	धेनुभ्यां	धेनुभ्यः
धेन्वाः - धेनोः	धेनुभ्यां	धेनुभ्यः
धेन्वाः - धेनोः	धेन्वोः	धेनूनाम्
धेन्वाम् - धेनौ	धेन्वोः	धेनुषु

नकारान्तः पुल्लिङ्गः 'राजन्' शब्दः (King)

राजा	राजानौ	राजानः
हे राजन्	हे राजानौ	हे राजानः
राजानं	राजानौ	राज्ञः
राज्ञा	राजभ्यां	राजभिः
राज्ञे	राजभ्यां	राजभ्यः
राज्ञः	राजभ्यां	राजभ्यः
राज्ञः	राज्ञोः	राज्ञाम्
राज्ञि - राजनि	राज्ञोः	राजसु

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
	दकारान्तः पुल्लिङ्गः 'तद्' शब्दः (He that)		
	सः	तौ	ते
	तं	तौ	तान्
	तेन	ताभ्यां	तैः
	तस्मै	ताभ्यां	तेभ्यः
	तस्मात्	ताभ्यां	तेभ्यः
	तस्य	तयोः	तेषां
	तस्मिन्	तयोः	तेषु
	दकारान्तः स्त्रीलिङ्गः 'तद्' शब्दः (She that)		
	सा	ते	ताः
	तां	ते	ताः
	तया	ताभ्यां	ताभिः
	तस्यै	ताभ्यां	ताभ्यः
	तस्याः	ताभ्यां	ताभ्यः
	तस्याः	तयोः	तासाम्
	तस्यां	तयोः	तासु
	दकारान्तः नपुंसकलिङ्गः 'तद् शब्दः' (That)		
	तत्	ते	तानि
	तत्	ते	तानि
	तेन	ताभ्यां	तैः
	तस्मै	ताभ्यां	तेभ्यः
	तस्मात्	ताभ्यां	तेभ्यः
	तस्य	तयोः	तेषां
	तस्मिन्	तयोः	तेषु

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्

इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः (Intellect)

मतिः	मती	मतयः
हे मते	हे मती	हेमतयः
मतिम्	मती	मतीः
मत्या	मतिभ्यां	मतिभिः
मत्यै मतये	मतिभ्यां	मतिभ्यः
मत्याः मतेः	मतिभ्यां	मतिभ्यः
मत्याः मतेः	मत्योः	मतीनाम्
मत्याम् मतौ	मत्योः	मतिषु

इकारान्तः नपुम्सकलिङ्गः 'वारि' शब्दः (Water)

वारि	वारिणी	वारीणि
हेवारे - हेवारि	हेवारिणी	हे वारीणि
वारि	वारिणी	वारीणि
वारिणा	वारिभ्यां	वारिभिः
वारिणे	वारिभ्यां	वारिभ्यः
वारिणः	वारिभ्यां	वारिभ्यः
वारिणः	वरिणोः	वारीणाम्
वारिणि	वारिणोः	वारिषु

मकारान्तः पुम्लिङ्गः 'किम्' शब्दः (What)

कः	कौ	के
के	कौ	कान्
केन	काभ्यां	कै
कस्मै	काभ्यां	केभ्यः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
	कस्मात्	काभ्यां	केभ्यः
	कस्य	कयोः	केषाम्
	कस्मिन्	कयोः	केषु

मकारान्तः स्त्रीलिङ्गः 'किम्' शब्दः (Who)

का	के	काः
कां	के	काः
कया	काभ्यां	काभिः
कस्यै	काभ्यां	काभ्यः
कस्याः	काभ्यां	काभ्यः
कस्याः	कयोः	कासाम्
कस्यां	कयोः	कासु

मकारान्तः नपुम्सकलिङ्गः 'किम्' शब्दः (What)

किं	के	कानि
किं	के	कानि
केन	काभ्यां	कैः
कस्मै	काभ्यां	केभ्यः
कस्मात्	काभ्यां	केभ्यः
कस्य	कयोः	केषाम्
कस्मिन्	कयोः	केषु

भू भव to be

Present Tense	भवति	भवतः	भवन्ति
	भवसि	भवथः	भवथ
	भवामि	भवावः	भवामः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Past	,,	अभवत्	अभवतां	अभवन्
		अभवः	अभवतं	अभवत
		अभवम्	अभवाव	अभवाम
Future	,,	भविष्यति	भविष्यतः	भविष्यन्ति
		भविष्यसि	भविष्यथः	भविष्यथ
		भविष्यामि	भविष्यावः	भविष्यामः

अस् to be

Present	,,	अस्ति	स्तः	सन्ति
		असि	स्थः	स्थ
		अस्मि	स्वः	स्मः
Past	,,	आसीत्	आस्तां	आसन्
		आसीः	आस्तं	आस्त
		आसं	आस्व	आस्म
Future	,,	भविष्यति	भविष्यतः	भविष्यन्ति

'गम्' गच्छ to go

Present	,,	गच्छति	गच्छतः	गच्छन्ति
Past	,,	अगच्छत्	अगच्छतां	अगच्छन्
Future	,,	गमिष्यति	गमिष्यतः	गमिष्यन्ति

लिख to write

Present	,,	लिखति	लिखतः	लिखन्ति
Past	,,	अलिखत्	अलिखतां	अलिखन्
Future	,,	लेखिष्यति	लेखिष्यतः	लेखिष्यन्ति

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

'धाव' to run

Present ,,	धावति	धावतः	धावन्ति
Past ,,	अधावत्	अधावतां	अधावन्
Future ,,	धाविष्यति	धाविष्यतः	धाविष्यन्ति

भक्ष to eat

Present ,,	भक्षयति	भक्षयतः	भक्षयन्ति
Past ,,	अभक्षयत्	अभक्षयतां	अभक्षयन्
Future ,,	भक्षयिष्यति	भक्षयिष्यतः	भक्षयिष्यन्ति

नृत्य to dance

Present ,,	नृत्यति	नृत्यतः	नृत्यन्ति
Past ,,	अनृत्यत्	अनृत्यतां	अनृत्यन्
Future ,,	नर्तिष्यति	नर्तिष्यतः	नर्तिष्यन्ति

पठ to read

Present ,,	पठति	पठतः	पठन्ति
Past ,,	अपठत्	अपठतां	अपठन्
Future ,,	पठिष्यति	पठिष्यतः	पठिष्यन्ति

फल to bear fruits

फलति	फलतः	फलन्ति
अफलत्	अफलतां	अफलन्
फलिष्यति	फलिष्यतः	फलिष्यन्ति

वाक्येषु योजयत (अ) प्रयोगः कार्यः

१. अश्वः २. मत्स्यः ३. कालिदासः ४. जननी ५. निर्मल
६. तडागेषु ७. अस्माकं ८. मेष्ठः ९. आकाशे १०. प्रसिद्धः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

११. ग्रामः १२. प्रतिदिनम् १३. पठन्ति १४. विप्राः १५. पाषाणः
१६. मधुरः १७. छात्राः १८. पश्यामः १९. लिखसि २०. खादामि ।

Lesson 1

जगद्गुरुः शङ्करः

पर्याय पदानि

१. ग्रामः, खेटकः,
२. पिता, तातः, जनकः
३. माता-जननी, जनयित्री प्रसूः
४. दिवं स्वर्गः, नाकः, त्रिदिवः
५. जनुः जननम्, जन्म birth

Lesson 2

मित्रं — सखा, सुहृत् २. ज्ञानं — बुद्धिः, मनीषा, धीः

Lesson 3

१. वनं, काननं, विटपी, अटवी, गहनं
२. सिंहः, मृगेन्द्रः, केसरी, मृगाशनः

Lesson 4

१. वृक्षः तरुः, पादपः, विटपी, महीरुहः
२. पर्वतः, अद्रिः, गिरिः, शैलः
३. सारमेयः शुनकः, भणकः कुक्कुरः

Lesson 5 Nil

Lesson 6

१. शरीरं, गात्रं, वपुः, तनुः कायः
२. पादः अङ्घ्रिः, चरणः
३. नेत्रं अक्षी, नयनं, लोचनं,

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Lesson 7

१. अश्वः, वाजिः, तुरगः, तुरङ्गः, हयः
२. भुजङ्गः Snake उरगः, पन्नगः पवनाशनः

Lesson 8

१. भाषा — गीः, भारती, वाणी

Lesson 9

१. वारि — आपः, सलिलं, जलम्,
२. पङ्कज — पद्मं, सरोजं, कमलं, सरसिजम्
२. भृङ्गः द्विरेफः षट्पदः भ्रमरः

Lesson 10

महिळा — वनिता, नारी, वधूः योषिता

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अनुक्रमणिका

CONTENTS

Class VIII

१	स्वामि विवेकानन्दः	३९
२	फलानां आपणः	४१
३	असत्यस्य फलम्	४३
४	शारदा	४५
५	व्याघ्रः	४६
६	संस्कृत भाषायाः महत्वम्	४८
७	आदि काव्यम्	५०
८	नद्यः	५२
	नीति श्लोकाः	५३
९	पण्डित जवहरलाल् नेहरु	५५
१०	श्रीभगवद्गीता माहात्म्यम्	५६
११	जन्तुशाला	५७
१२	रूपवाहिनी	५९

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सूचना — Hints ६२
समासः ६९
विराम पत्रम् ७०
मित्राय पत्रम् ७१
जनकाय पत्रम् ७२
General Points ७३
भक्तिश्लोकाः
श्रीगणेशपञ्चरत्नम् ७७
श्रीविष्णोर्द्वादशनामस्तोत्रम् ७८
श्रीमद्भगवद्गीता ७९
लिङ्गाष्टकम् ८३
श्रीगङ्गास्तोत्रम् ८४
शारदाभुजङ्गस्तोत्रम् ८६
श्रीकृष्णाष्टकम् ८७
बिल्वाष्टकम् ८८
श्रीरामचन्द्राष्टकम् ८९

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

१. स्वामि विवेकानन्दः

Word Meaning:

1. बहुः — Many
2. ऋषिः — sage
3. करुणा — mercy
4. नीति कथा — moral story
5. अशृणोत् — heard
6. उत्तरम् — Answer
7. संन्यासी — monk
8. प्रसिद्धिः — fame
9. महापुरुषः — greatman
10. प्रतिभा — ingenuity

Word Meaning:

अस्माकं भारत देशे बहुः ऋषयः आसन् इति कथां शृणुमः। परं नवीन युगे अपि एकः आसीत्। सः कः स एव स्वामि विवेकानन्दः। तस्य माता भुवनेश्वरी। पिता विश्वनाथ दत्ता। बाल्ये तस्य नरेन्द्रः इति नाम। सः करुणा पूर्णः आसीत्।

सः बि. ए. पर्यन्तं पठितवान्। परं बाल्ये मातृ सकाशात् रामायणं; महाभारतं पुराणं इति बहु नीति कथां अशृणोत्। नरेन्द्रः तत्र तत्र गत्वा, — वेद विचारं कृत्वा, देवं प्रत्यक्ष रूपेण दृष्टं वा इति बहुधा आक्षेपः कृतः। परं कोपि समीचीन उत्तरं न दत्तवान्। अन्ततः कल्कत्ता नगरे श्री रामकृष्णपरमहम्सं दृष्ट्वा भवान् देवं दर्शितवान् इति अपृच्छत् श्री रामकृष्ण परमहम्सः अवोचत्, यथा इदानीं त्वां पश्यामि तथैव देव स्वरूपं अपि मया दृष्टं इति हस्तं शिरसि स्थापितवान्। सद्यः एव नरेन्द्रः ईश्वर अनुभूतिं प्राप्तवान्। ततः प्रभृति सः संन्यासी बभूव। नरेन्द्रः विवेकानन्दः इति नाम्ना प्रसिद्धिं अगात्।

परिव्राजक रूपेण आसेतु हिमाचल पर्यन्त संञ्चारितवान्। तमिळनाडु महाजन साहाय्येन स्वामि-विवेकानन्दः अमेरिकां गतः तदारभ्य विश्व विख्यात महापुरुषः अभवत्। कन्याकुमारीं गत्वा तत्र ध्यानं कृतवान्। तदेव इदानीं विवेकानन्द स्मारकशिला रूपेण विद्यते। ततः उत्तिष्ठत, जाग्रत, प्राप्य वरान् निबोधत इति उपनिषत् वाक्यं च उक्तवान्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इत्थं सः ब्रह्मचर्य व्रतेन महत् कार्यं साधितवान्। भारते सर्वत्र श्री राम कृष्ण परमहंसस्य मठं स्थापितवान्। संस्कृते अपि प्रतिभापूर्णः आसीत्। यथा ओं स्थापकाय च धर्मस्य एकस्यां शिलायां उपविश्य।

सर्व धर्मस्वरूपिणे।
अवतार वरिष्ठाय श्री रामकृष्णायते नमः॥
इति।
तस्मै मुनिवराय श्री विवेकानन्दाय नमः

Questions:

१. स्वामि विवेकानन्दस्य माता का?
२. स्वामि विवेकानन्दस्य पिता कः?
३. स्वामि विवेकानन्दस्य गुरुः कः?
४. उपनिषत् मन्त्रं किम्? तस्य, विवेकानन्दस्य आंगिल अनुवादं कुरु।

Fill in the blanks:

१. परं नवीन युगे अपि एकः ... ... आसीत्।
२. सः ... ... पर्यन्तं पठितवान्
३. तमिलनाडु महाजन साहाय्येन स्वामि विवेकानन्दः ... ... गतः
४. सः ... ... पूर्णः आसीत्।

Translate into English:

भारत वर्षे हिमालयो नाम पर्वतः अतीव प्रसिद्धः। येऽन्ये पर्वताः सन्ति तेषु श्रेष्ठः असौ। अत एव एनं नगाधि राजः इति कथयन्ति। अत्युच्चानि शिखराणि नगस्य एतस्य। भारत वर्षस्य उत्तरस्यां दिशि पर्वतोऽसौ तिष्ठति। इत्थं असौसीमा प्रदेशे रक्षक इव स्थित्वा राष्ट्रं रक्षति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शब्दः "सर्वशब्दः" पुम्लिङ्गः

धातुः वर्तमानकालः

१. भवति २. वृत्यति ३. गणयति

समासः तत्पुरुषः

१. पुण्यं + श्रितः = पुण्यश्रितः

२. ग्रामं + गतः = ग्रामगतः

३. तेन + सदृशः = तत्सदृशः

२. फलानां आपणः

Word Meaning:

1. भगिनी — Sister
2. आम्रम — manog
3. जम्बीर फलम् — lemon
4. सेवम् — apple
5. दाडिमम् — pomegranate
6. नारङ्गम् — orange
7. नारिकेल फलं — coconut
8. आपणिकः — shopkeeper
9. यावत् — upto
10. अधुना — now

भ्रात्रा सह भगिनी अपि फलानां आपनं अगच्छत् । आपणे विविधानि फलानि आसन् । भगिनी अकथयत् भ्रात्रा अयं आपणः शोभनः । अत्र सर्वाणि फलानि सन्ति यथा आम्राणि जम्बीर फलानि, द्राक्षा, कदली फलानि, नारङ्गानि, नारिकेलं च वर्तन्ते ।

भ्राता वदति, सर्वाणि फलानि अतिमधुराणि वर्तन्ते । शरीरवर्धनाय अतीव साहाय्यं कुर्वन्ति फलानि । अतीव शीतलानि च । सर्वेषां कृते फलानि सात्विक भोजनं अस्ति । तस्मात् कारणात् मुनयः यतयः, साधवः च फलानि खादन्ति ।

हे भ्रात फलेषु अतीव मुख्यानि फलानि कानि ?

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रिय भगिनि फलेषु आम्र, पनस कदळी फलानि अतीव मुख्यानि। द्राविड भाषायां मुक्कनि इत्येव प्रसिद्धम्। कदली फलं देव पूजायां अतीव मुख्य स्थानं भवति।

भगिनी वदति, भ्रातः, द्वि किलोग्रां अम्र णि द्वादश, कदळी फलानि, द्वादश सेवा फलानि च गृह्णामि। मूल्यं आपणिकाय यच्छ आवां गृहं गच्छावः।

Questons :i

१. भ्राता भगिनी च कुत्र अगच्छताम् ?

२. आपणे कानि कानि फलानि सन्ति ?

३. आपणः कथं वर्तते ?

४. मूल्यं कस्मै दातव्यं ? इति भगिनी अवदत् ?

Fill in the blanks :

१. आपणे विविधानि ... ... सन्ति।

२. सर्वाणि फलानि अति ... ... भवन्ति।

३. सर्वेषां कृते फलानि .... भोजनं अस्ति।

४. आवां ... ... गच्छावः।

Translate into English :

गङ्गा, यमुना, ब्रह्मपुत्रादीनां नदीनां उद्गमः हिमालयादेव सञ्जातः। नगरेऽस्मिन् निबिडानि अरण्यानि सन्ति। तत्र क्रूरमृगाः दिवापि इतस्ततः अटन्ति अस्मिन्नेव पर्वते पुरा देवाः, गन्धर्वाः, यक्षाः च निवसन्ति स्म इति श्रूयते। इदानीं अपि धनिकाः जनाः ग्रीष्मकाले पर्वतस्य उपरि स्थितेषु नगरेषु निवासं कर्तुं प्रति वर्षं गच्छन्ति। भारतवर्षस्य मूर्ध्नि मुकुट इव शोभते हिमालयः।

शब्दः —

"सर्व शब्दः" स्त्रीलिङ्गः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

धातुः वर्तमानकाल

१. अस्ति २. जिघ्रति ३. अटति

समासः तत्पुरुषः

१. सर्पेण + दष्टः = सर्पदष्टः

२. चोरेण + अनुद्रुतः = चोरानुद्रुतः

३. भूतेभ्यः + बलिः = भूतबलिः

३. असत्यस्य फलम्

Word Meaning:

1. अजा – Goat
2. असत्यं — lie
3. व्याघ्रः — Tiger
4. प्रतिदिनं — daily
5. हसति — laughs
6. अवोचत् — told
7. उच्चैः — loud
8. आदाय — taking
9. जघान — killed
10. समीपं — near
11. ग्रामीणाः — villagers

Questions:

१. अजा पालकः कुत्र आसीत् ?

२. अजा पालकः विनोदाय किं अवोचत् ?

३. शब्दं श्रुत्वा सर्वे ग्रामिणः किं अकुर्वन् ?

४. भीतो बालकः किं अकरोत् ?

एकस्मिन् ग्रामे एकः पालकः आसीत्। सः प्रतिदिनं असत्यं भाषमाणः आसीत्। एकदा सः अजान् प्रचाराय वनं अगच्छत्। तत्र गत्वा सः एवं अचिन्तयत् इदानीं अहं विनोदाय असत्यं वदिष्यामि पश्यत इति।

सः बालकः उच्चैः स्वरैः व्याघ्रो आगच्छति, व्याघ्रो आगच्छति इति शब्दं अकरोत्। तत् शब्दं श्रुत्वा सर्वे ग्रामिणः शस्त्राणि आदाय बालकस्य समीपं अधावन्। तान् दृष्ट्वा सः बालकः हसन् व्याघ्रो न आगतः,

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विनोदाय उक्तं मया सर्वे गच्छन्तु इति अवोचत्। सर्वे ग्रामिणः कोपाविष्टाः स्व ग्रामं अगच्छन्।

अन्येद्युः सत्यमेव एको व्याघ्रः आगतः भीतो बालकः व्याघ्रो, व्याघ्रः इति उच्चैः रैः अवोचत्। सर्वेपि जनाः अयं बालकः असत्यवादी इति कोपि नागतः।

व्याघ्रः आगत्य बालकं जघान। तस्मात् विद्यार्थिनः न कदापि असत्यं वक्तव्यम्। सत्यमेव भाषणीयम्। असत्यवादिनो स्थितिं पश्यत।

Fill in the blanks:

१. एकदा सः अजान् ... ... वनं अगच्छत्।
२. इदानीं अहं विनोदाय ... ... वदिष्यामि।
३. अन्येद्युः ... .. एको व्याघ्रः आगतः।
४. कोपाविष्टः स्व ... ... अगच्छन्।

Translate into English:

हिमालयस्य शिखराणि सर्वदैव हिमेन आच्छादितानि भवन्ति। अत एव अस्य अभिधानं "हिमस्य आलयः" इति प्रथितम्। अस्य उत्तुङ्गाणि मेघाः आश्रयन्ति श्रूयते यत् तत्र तपस्विनः निवसन्ति, एकाग्रेन चित्तेन च परमेश्वरं ध्यायन्ति च।

समासः तत्पुरुषः —

१. प्रजायै + हितं = प्रजाहितम्
२. पापात् + मुक्तः = पापमुक्तः
३. स्वर्गात् + च्युतः = स्वर्गच्युतः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

४. शारदा

Word Meanings

1. शारदा — goddess
2. शुभ्रः — white
3. कमलं — lotus
4. हस्तः — hand
5. अपरं — another one
6. मयूरः — peacock
7. सदा — everytime
8. प्रसाद — grace
9. भक्तः — devotee
10. नामानि — names

एषा शारदा विद्यायाः देवता। तुषार इव धवळा अस्ति। शुभ्रं वस्त्रं धारयति। श्वेते कमले उपविशति। तस्याः वाहनं मयूरः हंसः च। कराभ्यां वीणां धारयति करेण एकेन जपमालां धारयति। अपरेण हस्तेन पुस्तकं धारयति। तथा च अस्याः चत्वारः हस्ताः सन्ति। मस्तके मुकुटं राजते।

कर्णयोः कुण्डले विलसतः। अस्याः प्रसादेन मानवः प्राज्ञः भवति। एतां सर्वे देवाः पूजयन्ति प्रणमन्ति च। एषा जाड्यं नाशयति भक्तानाम्। वयं अपि शारदां सदा अर्चामः। शारदायाः सरस्वती, वाग्देवी, वाणी इति नामानि सन्ति। श्री शारदायै नमः।

श्लोकं पठतः—

सरस्वती नमस्तुभ्यं वरदे कामरूपिणि।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥ १ ॥

विद्यादेवीं नमस्कृत्य विद्यारम्भं करोति यः।
विगतः सर्वदुःखानां श्रेयः सर्वं समश्नुते ॥ १ ॥

शारदा अनुग्रहेण भाषणे चतुरस्त्रा आयाति। वादे जयं च भवति। पुरा आदि शङ्करः अमरसिंहेन सह वादं अकरोत्। तदानीं शङ्कर भगवत्पादाः शारदां ध्यात्वा, अमरसिंहं अजयत्। अतः यः शारदां प्रार्थयति, सः ध्रुवं मेधावी भवति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Questions:

१. विद्यायाः देवता का ?

२. तस्याः कति हस्ताः ।

३. तस्याः वाहनं किं ?

४. तस्याः अनुग्रहेण किं भवति ?

Fill in the blanks:

१. एषा .... ।

२. श्वेते ... ... उपविशति ।

३. हस्तेन ... ... धारयति ।

४. श्री शारदायै .. ... ।

Translate into English:

इयं गौः । एषा मङ्गल दर्शना इयं प्रकृत्या आकारेण च परमा साध्वी । अस्याः लम्बं पुच्छं सरलं शृङ्ग युगलम् । शिथिलं कर्णद्वयं च साधुतां परिचाययन्ति ।

समासः तत्पुरुषः

१. राज्ञः + पुरुषः = राजपुरुषः

२. भुवः + पति = भूपतिः

३. वृक्षस्य + मूलं = वृक्षमूलं

५. व्याघ्रः

Word Meaning:

1. क्रूरः — wild
2. पुष्टः — strong
3. लोलुपः — greedy
4. पीतः — yellow
5. कृष्ण पट्टः — dark stripe
6. एकजातीय — of one family
7. व्याघ्रः — tiger
8. मार्जारः — eat
9. वृक्षः — tree
10. भ्रमति — wandering

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

व्याघ्र इति अतिक्रूरः प्राणी भारत देशे वनेषु दृश्यते। वन्य पशुषु सः अतीव बलवान्। व्याघ्रस्य चत्वारः पादाः सन्ति। तस्य लाङ्गूलं दीर्घं पुष्टं च वर्तते। व्याघ्रस्य वर्णः पीतः। तस्य शरीरे कृष्ण पट्टाः सन्ति। व्याघ्रः मार्जारश्च एक जातीयौ इति लोकवादः। मार्जारिः वृक्षं आरोढुं शक्तः व्याघ्रेण तन्न शक्यम्। अतः व्याघ्रेण अनुद्रुताः नराः यदि क्षिप्रं वृक्षं आरोहन्ति तर्हि सुखेनने प्राणान् रक्षेयुः।

इतरेभ्यः पशुभ्यः व्याघ्रः शीघ्रतरं धावति।
हिंस्राणां मृगाणां मध्ये स्वभावतया अति क्रूरः॥

व्याघ्रः दिवा आतपं असहमानः गुहायां स्थित्वा रात्रौ आहारार्थं भ्रमति। मांस भक्षणे व्याघ्रः अतीव लोलुपः। यदा यदा मृगान् पश्यति तेषां उपरि निपत्य तन्मांसं भक्षयति। व्याघ्रस्य शार्दूलः इति अपरं नाम। व्याघ्रः अस्माकं राष्ट्र प्राणिस्थाने विलसति।

Questions:

१. वन्य पशुषु कः बलीयान्?
२. व्याघ्रस्य वर्णः कः?
३. व्याघ्राय किं भक्ष्यं रोचते?
४. व्याघ्राः दिवा कुत्र निवसन्ति?

Fill in the blanks:

१. व्याघ्रस्य ... ... पादाः सन्ति।
२. तस्य लाङ्गूलं दीर्घं ... ... च वर्तते।
३. व्याघ्रस्य वर्णः ... ... ।
४. व्याघ्रः मारिश्च एक जातीयौ इति ... ... ।

Translate into English:

गावः विविध वर्णाः भवन्ति। ताः श्यामाः, गौर्यः धवलाः धूसराश्च। एताः भारतात् बहिः जपान्, चीन, अमेरिका प्रभृतिषु देशेष्वपि सन्ति। गौः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

घासं धान्यं च भक्षयति। एषा अल्प चर्वितं खाद्यं निगिलति, पुनः रोमान्थ वर्तयति।

समासः तत्पुरुषः

१. विद्यायां + प्रवीणः = विद्या प्रवीणः
२. न + पण्डितः = अपण्डितः
३. न + शक्तः = अशक्तः

६. संस्कृत भाषायाः महत्वम्

Word Meaning :

1. मधुरा — sweet
2. नामान्तराणि — other names
3. प्राचीनतमा — very old
4. उत्तर — North
5. दक्षिण — south
6. नानाविध — various
7. अङ्गीकृतम् — accept
8. बहुशः — many
9. महाकविः — great poet
10. प्राज्ञः — Learned

संस्कृत भाषा अतीव मधुरा अस्ति। संस्कृतं देव वाणी, गीर्वाणी, इति अस्याः नामान्तराणि सन्ति। इयं भाषा प्राचीनतमा इति सर्वैः अङ्गीकृतम्। अतिप्राचीन ग्रन्थः तु ऋग्वेदः। प्रायेणः सर्वासां भाषाणां संस्कृत भाषा मातृ-भाषा वर्तते।

उत्तर भारतीय सर्वासु भाषासु संस्कृत पदानि अधिकं दृश्यन्ते। तथैव दक्षिण भारतीय भाषासु अपि संस्कृत पदानि बाहुल्येन वर्तन्ते। किं बहुना श्रीलङ्कायां विद्यमान सिंहला भाषायां अपि संस्कृत पदानि बहुशः विलसन्ति। इत्थं इयं भाषा साहित्य विषये व्याकरण विषये, नवीन विज्ञान अणुः विषयः इति नानाविध विषयेषु अपि समृद्धिं भजते।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृते बहुवो कवयः आसन् । यथा वाल्मीकिः, वेदव्यासः, महाकवि कालिदासः, पञ्चतन्त्र कर्ता विष्णुशर्मा, अर्थशास्त्र प्रणेता चाणक्यः, गणितज्ञाः, आर्यभट्टा, भास्कराचार्यः, वराहमिहरः इति अनेके महाप्राज्ञाः आसन्

नवीनयुगे अपि संस्कृते आदर्श वाक्यानि विलसन्ति यथा

सत्यमेव जयते	—	राष्ट्रमुद्रा
सत्यं – शिवं – सुन्दरम्	—	रूपवाहिनी
अहर्निशं सेवामहे	—	दूरभाषणम्
शन्नो वरुणः	—	नाविक विभागः
शन्नोवायुः	—	विमान विभागः
योगक्षेम वहाम्यहं अभयं सर्वदा	—	जीव रक्षण विभागः
वयं रक्षामः	—	सेना विभागः
सर्वजन हिताय सर्वजन सुखाय	—	आकाशवाणी

इति आदर्श वाक्यानि सर्वत्र विलसन्ति । तस्मात् अस्माभिः संस्कृतभाव अवश्यं पठनीया अस्ति ।

Questions :

१. संस्कृत भाषा कथं अस्ति ?

२. संस्कृत भाषा कवीनां नामानि कानि ?

३. पञ्चतन्त्र कर्ता कः ?

४. अर्थ शास्त्र प्रणेता कः ?

Fill in the blanks :

१. अनेके .... — आसन् ।

२. तस्मात् वयं संस्कृत भाषां अवश्यं ... ... ।

३. इयं भाषा ... ... इति सर्वैः अंगीकृतम् ।

४. सिंगल भाषायां अपि .. .... बहुशः विलसन्ति ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Translate into English :

कोऽयं वृक्षः । अयं नारिकेल वृक्षः एक्षः सरलः महोच्छ्रायश्च । आम्रवृक्षस्येव अस्य शाखाः न सन्ति । अस्य शिखरं पत्राणां गुच्छो भवति । कदळीवृक्षस्यापि शाखाः न भवन्ति । परन्तु नायं ताल इव महोत्तुंगः ।

समासः कर्मधारयः

१. नीलं च + तत् उत्पलं च = नीलोत्पलम्
२. कृष्णश्चासौ + मेघश्च = कृष्ण मेघः
३. शीतं च + तत् उदकं च शीतोदकम्

७. आदि काव्यम्

Word Meaning :

1. व्याधः — hunter
2. प्रकृतिः — Nature
3. महान्त — Greatman
4. काण्डाः — Parts
5. नाशः — Destroy
6. नायकः — Hero
7. धर्मः — Dharma
8. आधारभूतं — Basic
9. इतर भाषा — other Language
10. जयः — victory

काव्यं इति शब्देन, वाल्मीकिरामायणं एव स्मृति पथं आगच्छति । सत्यमेव भारते वेदकालात् परं प्रथमं रचितं काव्यं वाल्मीकि रामायणम् । तस्मात् कारणात् रामायणम् आदि काव्यं इति उच्यते ।

अस्य रामायणस्य कर्ता वाल्मीकिः । अयं व्याधः, नारद महर्षेः उपदेशेन रामायणं रचितवान् ।

महाकाव्य लक्षणोपेतं रामायणम् । यथा रामायणे प्राकृतिक वर्णनं, वन वर्णनं, नदी वर्णनं, पर्वत वर्णनं चन्द्र, सूर्योदयवर्णनं, समुद्रवर्णनं इति अनेक वर्णन स्थानानि सन्ति ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इतर भाषासु अपि रामायण कथा अस्ति। यथा द्रविड भाषायां कम्बर, हिन्दी भाषायां तुळसीदासः इति अनेके महान्तः रामायणं कृतवन्तः। तेषां कथायाः आधार भूतं वाल्मीकि रामायणं एव।

रामायणे सप्त काण्डाः सन्ति. पञ्चशत सर्गाः सन्ति। चतुः विंशतिः सहस्राणि श्लोकाः सन्ति। धर्मस्य जयः, अधर्मस्य नाशः एव रामायणस्य कथा सारांशः। रामः महाविष्णोः अवतारः। धर्मो विग्रहवान् श्री रामाय नमः।

पाठयम्

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥

Questions:

१. वाल्मीकिः कस्य उपदेशेन रामायणं रचितवान्?
२. आदि काव्यस्य रामायणस्य कर्ता कः?
३. द्रविड भाषायां रामायणस्य कर्ता कः?
४. रामायणस्य सारांशः कः?

Fill in the blanks:

१. रामायणस्य नायकः ... .।
२. रामायणे .. .... काण्डाः सन्ति।
३. ... ... सर्गाः सन्ति।
४. श्री रामः ... ... अवतारः।

Translate into English:

नारिकेळस्य पत्राणां परिणाहं पश्यत। अन्यो वृक्षः ईदृशानि बृहन्ति दलानि दधति। वृक्ष राजोऽयं छदानं छत्रं इव शिरसि बिभर्ति। दलानां अधस्तात् अस्य फलानि लग्नानि सन्ति। तानि कानिचित् लघूनि, कानिचित् हरितानि, अन्यानि च कपिश वर्णानि सन्ति। इमानि फलानि मधुरेण पयसा पूरितानि सन्ति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कर्मधारय समासः

१. नरश्चासौ + अधमश्च = नराधमः
२. नरश्चासौ + उत्तमश्च = नरोत्तमः
३. शीतश्च + उष्णश्च = शीतोष्णम्

८. नद्यः

Word Meaning :

1. नद्यः — rivers
2. त्रिधा — In three parts
3. जीवनदी — perennial river
4. प्रवहन्ति — flows
5. महानदी — big river
6. बहु प्रयोजनं — very useful
7. नौका — boat
8. शुद्धं — pure
9. सर्वदा — always
10. शाखा — branch

नद्यः, जीवनद्यः, उप नद्यः, शाखा नद्यः इति त्रिधा भवन्ति। यासु नदीषु सर्वदा जलं प्रवहति ताः नद्यः जीवनद्य इति कथ्यन्ते। याः नद्यः कस्यांचित् महानद्यां सम्मिलन्ति ता उपनद्यः इत्युच्यन्ते। या काश्चिन् महानद्यः पृथक् भूताः प्रवहन्ति तासां शाखा नद्य इति नाम भवति।

गङ्गा, यमुना, सरयू, गोदावरी, कृष्णा, तुङ्गभद्रा, कावेरी, ताम्रपर्णी एवमादयः जीव नद्यः इत्युच्यन्ते। एता दश पुण्य नदीभिः अलङ्कृत भारत देशः पुण्य भूमिः इति नाम भजते।

अस्माकं नदीभिः बहुप्रयोजनं अस्ति। जना नदीषु स्नान्ति, नदी जलं कृषिकर्मणि उपयोजयन्ति, पिबन्ति, पशून् पाययन्ति च। गङ्गा, गोदावरी इत्यादि महानदीषु मध्ये नौकाः गच्छन्ति। नौकया जनाः इतस्ततः गत्वा स्व कार्यं साधयन्ति। गङ्गाजलं सर्वदा शुद्धं भवति। भारतीयाः जनाः नदीं मातृवत् पूजयन्ति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Questions :

१. नद्यः कति विधाः भवन्ति ;
२. काचन नदीनां नामानि वदत ?
३. पुण्य भूमिः इति नाम कथं भजते अस्माकं देशः ?
४. नद्याः प्रयोजनं किम् ?

Fill in the blanks :

१. गङ्गा जलं सर्वदा ... ... भवति ।
२. भारतीयाः जनाः नदीं ... ... पूजयन्ति ।
३. महा नदीषु मध्ये ... ... गच्छन्ति ।
४. अस्माकं नदीभिः ... ... अस्ति ।

Translate into English :

वयं बहुधा नारिकेळस्य पयः पिबामः । इदं दीपनं पावनं च भवति । इदमेव परिपाकं गच्छत दुग्ध घनं जायते । तच्च परिपक्व वर्तुलाकारं बीजं निर्माति । तत् बीजं वयं खादामः । इदं सुस्वादु, मधुरं, स्निग्धं पुष्टिकरं च भवति ।

कर्मधारय - मासः

१. मेघ + इव + श्यामः = मेघश्यामः
२. पयः + इव + धवलम् पयोधवलम्
३. कर्पूर + इव + गौरः कर्पूगौरः

नीति श्लोकाः

अपूर्व कोऽपि कोशोऽयं विद्यते तव भारती ।
व्ययतो वृद्धिं आयाति क्षयं आयाति संचयात् ॥ १ ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नारिकेळ समाकाराः दृश्यन्ते हि सज्जनाः ।
अन्ये बदरिकाकाराः बहिरेव मनोहराः ॥ २ ॥

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥ ३ ॥

महाजनस्य संसर्गः कस्य नोन्नति दायकः ।
पद्म पत्र स्थितं वारि धत्ते मुक्ता फलश्रियम् ॥ ४ ॥

चिन्तनीया हि विपदां आदौ एव प्रति क्रिया ।
न कूप खननं युक्तं प्रदीप्ते वह्निना गृहे ॥ ५ ॥

सर्प क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः ।
मन्त्रौषधिवशः सर्पः खलः केन निवार्यते ? ॥ ६ ॥

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥ ७ ॥

दिवा पश्यति नोलूकः काको नक्तं न पश्यति ।
विद्या विहीनो मूढस्तु दिवा नक्तं न पश्यति ॥ ८ ॥

Proverbs :

१. अवश्यं भाविनो भावाः भवन्ति महतामपि ।
२. अभद्रं भद्रं वा विधि लिखितं उन्मूलयति कः ?
३. अम्बुनो बिन्दुरल्पोपि शुक्तौ मुक्ता फलं भवेत् ।
४. एकः करोति पापानि फलं भुङ्क्ते महाजनाः ।
५. अर्थार्थं प्रवर्तते लोकः ।
६. अल्पानमपि वस्तुनां संहतिः कार्यसाधिका ।
७. गुणवत् वस्तु संसर्गात् याति खल्वोऽपि गौरवम् ।
८. अति मात्रोपहासस्तु कलहाय प्रकल्पते ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

९. अयं अपरः शरावसेकः ।

१०. अन्त पुरगतं आपणे घुष्यते ।

पत्रं रचना :

१. विराम पत्रम् २. जनकाय पुत्रस्य पत्रम्

९. पण्डित जवहरलाल् नेहरु

Words Meanings :

1. अध्ययनं — study
2. प्रयागः — Allahabad
3. न्याय शाखा—Law course
4. न्यायाधिपतिः — Judge
5. सर्वस्वं — Allthings
6. हिताय — for good
7. संलग्नः — (absorbed) involved
8. प्रवेश परीक्षा—Entrance Examination
9. प्रतिनिवृत्तः — Returning
10. शिशुः — child

पण्डित जवहरलाल् नेहरु प्रयाज नगरे १८८९ तमे वर्षे जातः । तस्य पिता मोत्तिलाल् नेहरु । माता स्वरूपाणि । सः जन्मनः एव अतीव धनिकः आसीत् । तस्मात् कारणात्, निपुण अध्यापक साहाययेन गृहे एव पाठितः । प्रवेश परीक्षायां उत्तीर्णः, विदेशं गत्वा, न्याय शास्त्रायां निपुणः अभवत् ।

अध्ययनं परिसमाप्य भारतं प्रतिनिवृत्तः । आंग्लेयानां अट्टहासं असहमानः भारतीय स्वातन्त्र्याय बहुपरिश्रमं प्राप्तः । महात्मागान्धि महाशयस्य सत्याग्रहे संलग्नः अभवत् । अस्य पूर्वपुरुषाः नेहरु तटे अवसन् अतः नेहरु इति उपनाम्ना प्रसिद्धः अभवत् एषः शिशुषु स्निह्यतिस्म । शिशवः एतं पितृव्यः नेहरु इति वदन्ति । अस्य कीर्तिः विश्वे प्रसृतः अतः प्रतिवर्षे नवम्बर मासस्य १४ तमे दिनाङ्के तस्य जन्मदिनं शैशव दिन महोत्सव रूपेण प्रचाल्यते । नेहरु शान्त स्वभावः, शान्ताभिलाषि च । देश हिताय एषः सर्वस्वं अददात् । १९६४ तमे वर्षे लोकप्रियः नेहरु परलोकं अगच्छत् । शान्त स्वरूपाय नमः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Questions :

१. पण्डित नेहरु महाभागस्य माता का ?

२. पण्डित नेहरु महा भागस्य पिता कः ?

३. कुत्र गत्वा न्यायशास्त्रं अधीतवान् ?

४. शिशूनां कृते कः स्निह्यति स ?

Fill it :

१. सः जन्मनः एव अतीव ..... आसीत् ।

२. विदेशं गत्वा न्यायशास्त्रायां — — अभवत् ।

३. शिशवः एतं — — नेहरु इति वदन्ति ।

४. अस्य — — विश्वे प्रसृतः ।

१०. श्रीभगवद्गीता माहात्म्यम्

Words Meanings :

1. युद्धं — war
2. प्रारब्धं — started
3. सहोदरः — brother
4. अज्ञानं — ignorance
5. ज्ञानं — knowledge
6. उक्तं — said
7. नायकः — Hero/Leader
8. जीवनं — life

श्रीमत् भगद्गीता महाभारतयुद्ध समये उक्तं अस्ति । भगवान् श्री कृष्णः अर्जुनाय उपदेशं कृतवान् । तदेव वयं अस्माकं भगवद्गीता इति वदामः ।

महाभारत युद्धं प्रारब्धम् । दुर्योधनः अर्जुनस्य सहोदरः अस्ति । तस्मात् युद्धमध्ये, अर्जुनः कृष्णं प्रति एवं वदति, भो कृष्ण । अस्माकं सहोदरान् हत्वा कथं जीवितुं शक्यं इति . अर्जुनस्य एतादृश अज्ञान दूरीकरणाय, आत्मज्ञान बोधनाय च भगवद्गीता उक्तम् ।

श्रीमद्भगवद्गीतायां अष्टादश अध्यायाः सन्ति । सप्तशत श्लोकाः भवन्ति । भगवान् श्री कृष्णः एव सर्वलोक नायकः इति विश्वरूप दर्शनेन अर्जुनः सम्यक्

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ज्ञातः । अतः अर्जुनः भगवद्गीतां श्रुत्वा, युद्धाय प्रयत्नं कृतवान् । दुष्टनिग्रहं, शिष्टपरिपालनं च न्याय मार्गेण कृतम् ।

किमधि कविस्तरेण सर्वासां उपनिषदां सारः अत्र संक्षिप्तः पश्यत

गीता सुगीताकर्तव्या किमन्यैः शास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुख पद्मात् विनिस्मृता ॥

भगवान् श्री कृष्णः उपदिशति,
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्व पापेभ्यो मोक्षयिष्यामि मा शुचः ॥

"श्री कृष्णाय नमः"

Questions :

१. श्रीमद् भगवद् गीता कुत्र उक्तं अस्ति ?
२. भगवद्गीतां कः कस्मै उपदेशं कृतवान् ?
३. गीतायां कति श्लोकाः सन्ति ?
४. गीतायां कति अध्यायाः सन्ति ?

Fill it :

१. महाभारत ... ... प्रारब्धम् ।
२. भगवान् ... ... एव सर्वलोक नायकः अस्ति ।
३. अर्जुनस्य सहोदरः ... . अस्ति ।

११. जन्तुशाला

Words Meanings :

1. जन्तुशाला — Zoo
2. कीटाः — — worms
3. खगाः — birds
4. मृगाः — animals

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

5. कार्यकर्तारः — workers
6. चिकित्सकः — Doctor
7. पञ्जरं — case
8. पालनं — protection
9. प्रसन्नचित्ताः — cheerful mind
10. हसन्ति — laugh

लोके अनेके जन्तवः जीवन्ति। ते कीटाः, खगाः, मृगाः, मनुष्याः, च भवन्ति। सर्वेषां प्राणिनां जलं, वायुः, अन्नं, वासस्थानं, च आवश्यकं भवति।

मनुष्यः गृहे निवसति। परं मृगाः वने वसन्ति। मृगाणां, पालकः वने वसन्ति। वने मृगाणां, पालकः नास्ति। अतः पशु पालनार्थं जन्तुशाला, स्थापिता अस्ति।

जन्तुशालायां नाना विधाः, मृगाः, खगाः च निवसन्ति। मृगेषु सिंहः व्याघ्रः, वृकः, शृगालः, इत्यादि पशवः, वन्य मृगाः इति कथ्यन्ते। अश्वः, वानरः, हरिणः, सारमेयः, बिडालः, धेनुः च साधु प्राणिनः इति कथ्यन्ते।

सिंहः, व्याघ्रः, चित्रकादयः, मांस भक्षिणः। हरिणः। गजः, अश्व इत्यादयः शाक भक्षिणः च सन्ति।

जन्तु शालायां कार्यकर्तारः, यथाकालं तेषां प्राणिनां भोजनं यच्छन्ति। प्राणि चिकित्सक रोग मृगाणां चिकित्सां करोति।

सिंहादयः पञ्जरे स्थापिताः सन्ति। हरिणः, अश्वः वानराः च इतस्ततः धावन्ति। मयूराः नृत्यन्ति। खगाः कूजन्ति। एतान् दृष्ट्वा बालकाः प्रसन्न चित्ताः हसन्ति।

Questions:

१. लोके के के (नामानि वदत) जन्तवः निवसन्ति?
२. सर्वेषां प्राणिणां कानि आवश्यकानि भवन्ति?
३. मांस भक्षिणः मृगाः के?
४. शाक भक्षिणः मृगाः के?

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Fill it :

१. मनुष्यः ... ... निवसति।
२. मृगाः ... ... निवसन्ति।
३. सिंहादयः ... . स्थापिताः सन्ति।

१२. रूपवाहिनी

Words Meanings :

1. विज्ञान — Scientific world
2. प्रतिगृहं — every house
3. रूपवाहिनी — Television
4. अपरं नाम — another name
5. समाचारः — news
6. आकाशवाणी — Radio
7. मुख्य कारणं — main reason
8. बुद्धिः — knowledge/wisdom

विज्ञान युगे रूपवाहिन्याः स्थानं अतिमुख्यं अस्ति। प्रतिगृहे अपि रूपवाहिनी अस्ति। सर्वे वयं रूपवाहिनीं दृष्ट्वा आनन्दं अनुभवामः। रूपवाहिन्या अपरं नाम दूरदर्शिनी रूपवाहिनी द्वारा वयं समाचारः, चित्रं, नाटकं, बालक विनोदाय चित्रम्, कथा प्रशस्ता, वार्तालापः इत्यादि अनेक विषयान् जानीमः।

इतः पूर्वं आकाशवाणी अतिमुख्यं आसीन्। आकाशवाणी द्वारा शब्द मात्रं शृणुमः। परं रूपवाहिनी द्वारा प्रत्यक्ष रूपेण चित्रं शब्दं च पश्यामः इदमेव विज्ञान अभिवृद्धेः मुख्य कारणम्।

मार्कोणिः आकाश वाणीं आविष्कृतवान् रूपवाहिनी तु १९२१ तमे वर्षे जान बेयर्ड् सि. एफ् जांकिन् इति उभयोः बुद्धि चातुर्येण आविष्कृते अस्ति पस्तत विज्ञानस्य चमत्कारम्।

Questions :

१. प्रतिगृहे किमस्ति ?
२. आकाशवाणीं कः आविष्कृतः ?

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

३. रूपवाहिनीं कौ आविष्कृतवन्तौ ?

४. रूपवाहिनी द्वारा किं जानीमः ?

Fill up:

१. रूपवाहिन्याः अपरं नाम ... ... ।

२. ... ... द्वारा शब्दमात्रं शृणुमः ।

३. पश्यत ... ... चमत्कारम् ।

Slokas:

अनेक शास्त्रं बहुवेदितव्यं अल्पश्च कालो बहवश्च विघ्नाः ।
यत्सार भूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बु मिश्रात् ॥ ९ ॥

मुक्ता फलैः किं मृगपक्षिणां च मिष्टान्नपानं किमु गर्दभानाम् ।
अन्धस्य दीपो बधिरस्य गीतं मूर्खस्य किं शास्त्र कथा प्रसङ्गः ॥ १० ॥

अश्वस्य भूषणं वेगः मन्दं स्यात् गज भूषणम् ।
चातुर्यं भूषणं नार्यः उद्योगः नरभूषणम् ॥ ११ ॥

गुणवज्जन संसर्गात् याति नीचोऽपि गौरवम् ।
पुष्प मालानुषङ्गेन सूत्रं शिरसि धार्यते ॥ १२ ॥

Proverbs:

११. उपदेशात् उत्तमं स्वयमनुष्ठानम् ।
Example is better than precept.

१२. दृढ सङ्कल्पो विधेः प्रियः ।
Strong determination pleases God.

१३. प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।
Prevention is better than cure.

१४. दुःसङ्गात् एकाकीवरम् ।
To be alone is better than bad association.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

१५. कः परः प्रियवादिनाम् ।

Nothing is greater than sweet words.

Translate into English :

विश्वस्य पुरातनतमा भाषा संस्कृतम् । अस्याध्ययनस्य प्रचारस्य च कालोऽयमागतः । इयं भाषा अद्यापि भारते व्यवह्रियते । यद्यपि पुरातनस्वरूपात् भिन्नं स्वरूपं अस्याः वर्तते अद्यत्वे । अस्यां भाषायां भारतीय संस्कृतिः निहितमस्ति उत्तर भारतस्य भाषाणां अध्ययनाय संस्कृत ज्ञानं परं आवश्यकम् । दक्षिण भारतीय भाषासु च संस्कृतशब्दानां प्राबल्यं दरीदृश्यते एव ।

पाठ-10 :—

पुरा संस्कृतं भारतस्य सांस्कृतिक भाषा आसीत् । अद्यापि इयमेव भाषा इदं पदं अधिष्ठातुं समर्था । तस्य साहित्यं विशालं सर्वव्यापि च । अस्माकं संस्कृतिः केवलं संस्कृतेनैव ज्ञातुं शक्या । संस्कृतेनैव अस्माकं पुण्यभूमेः महत्सम्मानं पुरा आसीत् । अद्यापि चास्माकं देशः अनेनैव सम्मान भाजनं वर्तते ।

पाठ-11 :—

यथा संस्कृतं सुदीर्घकालं भारतस्य सांस्कृतिकी भाषा आसीत् । तथा मध्य युगेषु लेटिन भाषा एशियायाः मुख्यभूमेः युरोपस्य च सांस्कृतिकी भाषा आसीत् । यथा च भारतस्य प्रादेशिक्यः भाषाः शनैः शनैः संस्कृतस्य स्थाने स्वतन्त्राः भाषाः अभवन्, तथैव यूरोपस्य प्रादेशिक्य भाषाः अपि लेटिन भाषायाः स्थाने स्वतन्त्राः भाषाः अभवन् ।

पाठ-12 :—

संस्कृत भाषायामेव सा शक्तिः, या वैदिकीं संस्कृतिं पुनरुज्जीवयितुं वैदिकी संस्कृतिरेव हि विश्वेऽस्मिन् पुनः शान्तिं स्थापयितुं समर्था । वेदान् शास्त्राणि उपनिषदः, महाभारतं रामायणं अन्यानपि धार्मिकान्, सांस्कृतिकांश्च ग्रन्थान् समाधिगन्तुं संस्कृत भाषा नितान्तमावश्यकी ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Class VIII

वाक्येषु प्रयोगः कार्यः —

१. ऋषिः २. पर्वतः ३. खादन्ति ४. गच्छावः ५. असत्यं ६. सत्यं ७. पुस्तकं ८. वस्त्रं ९. व्याघ्रस्य १०. भाषा ११. काव्यम् १२. वृक्षः १३. नद्यः १४. गच्छन्ति १५. वायुः १६. मृगाः १७. आनन्दं १८. आविष्कृतः १९. वदामः २०. सहोदरः ।

"सूचना" — Hints

Essay — Topics

रचना — शीर्षकाः

१. स्वामि विवेकानन्दः ।
२. संस्कृत भाषायाः महत्त्वम् ।
३. श्रीमद्भगवद्गीतायाः महत्त्वम् ।

अकारान्तः पुंल्लिङ्गः 'राम' शब्दः

रामः	रामौ	रामाः
हे राम	हे रामौ	हे रामाः
रामम्	रामौ	रामान्
रामेण	रामाभ्यां	रामैः
रामाय	रामाभ्यां	रामेभ्यः
रामात्	रामाभ्यां	रामेभ्यः
रामस्य	रामयोः	रामाणाम्
रामे	रामयोः	रामेषु

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अकारान्तः स्त्रीलिङ्गः 'लता' शब्दः (Creaper)

लता	लते	लताः
हे लते	हे लते	हे लताः
लतां	लते	लता
लतया	लताभ्यां	लताभिः
लतायै	लताभ्यां	लताभ्यः
लतायाः	लताभ्यां	लताभ्यः
लतायाः	लतयोः	लतानां
लतायां	लतयोः	लतासु

अकारान्तः नपुंसकलिङ्गः 'वन' शब्दः (Forest)

वनं	वने	वनानि
हे वन	हे वने	हे वनानि
वनं	वने	वनानि
वनेन	वनाभ्यां	वनैः
वनाय	वनाभ्यां	वनेभ्यः
वनात्	वनाभ्यां	वनेभ्यः
वनस्य	वनयोः	वनानां
वने	वनयोः	वनेषु

इकारान्तः पुंल्लिङ्गः 'पति' शब्दः (Husband)

पतिः	पती	पतयः
हे पते	हे पती	हे पतयः
पतिं	पती	पतीन्
पत्या	पतिभ्यः	पतिभिः
पत्ये	पतिभ्यः	पतिभ्यः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पत्युः	पतिभ्यः	पतिभ्यः
पत्युः	पत्योः	पतीनां
पत्यौ	पत्योः	पतिषु

दकारान्तः स्त्रीलिङ्गः 'तद्' शब्दः (she, that)

सा	ते	ताः
ताम्	ते	ताः
तया	ताभ्यां	ताभिः
तस्यै	तभ्यां	ताभ्यः
तस्याः	ताभ्यां	ताभ्यः
तस्याः	तयोः	तासां
तस्यां	तयोः	तासु

दकारान्तः नपुंसकलिङ्गः 'तद्' शब्दः (that)

तत्	ते	तानि
तत्	ते	तानि
तेन	ताभ्यां	तैः
तस्मै	ताभ्यां	तेभ्यः
तस्मात्	ताभ्यां	तेभ्यः
तस्य	तयोः	तेषां
तस्मिन्	तयोः	तेषु

दकारान्तः 'अस्मद्' शब्दः त्रिषुलिङ्गेषु समानरूपः

अहं	आवां	वयं
मां, मा	आवां, नौ	अस्मान्, नः
मया	आवाभ्यां	अस्माभिः
मह्यं, मे	आवाभ्यां, नौ	अस्मभ्यं, नः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मत्	आवाभ्यां	अस्मत्
मम मे	आवयोः नौ	अस्माकं नः
मयि	आवयोः	अस्मासु

ईकारान्तः स्त्रीलिङ्गः 'नदी' शब्दः (River)

नदी	नद्यौ	नद्यः
हे नदि	हे नद्यौ	हे नद्यः
नदीम्	नद्यौ	नदीः
नद्या	नदीभ्यां	नदीभिः
नद्यै	नदीभ्यां	नदीभ्यः
नद्याः	नदीभ्यां	नदीभ्यः
नद्याः	नद्योः	नदीनां
नद्यां	नद्योः	नदीषु

उकारान्तः पुम्लिङ्गः 'गुरु' शब्दः (Teacher)

गुरुः	गुरू	गुरवः
हे गुरो	हे गुरू	हे गुरवः
गुरुम्	गुरू	गुरून्
गुरुणा	गुरुभ्यां	गुरुभिः
गुरवे	गुरुभ्यां	गुरुभ्यः
गुरोः	गुरुभ्यां	गुरुभ्यः
गुरोः	गुर्वोः	गुरूणाम्
गुरौ	गुर्वोः	गुरुषु

दकारान्तः पुम्लिङ्गः 'तद्' शब्दः (He, that)

सः	तौ	ते
तं	तौ	तान्

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तेन	ताभ्यां	तैः
तस्मै	ताभ्यां	तेभ्यः
तस्मात्	ताभ्यां	तेभ्यः
तस्य	तयोः	तेषां
तस्मिन्	तयोः	तेषु

दकारान्तः 'युष्मद्' शब्दः त्रिषुलिङ्गेषु समानरूपः (you)

त्वं	युवां	यूयं
त्वां, त्वा	युवां, वां	युष्मान्, वः
त्वया	युवाभ्यां	युष्माभिः
तुभ्यं, ते	युवाभ्यां, वां	युष्मभ्यं, वः
त्वत्	युवाभ्यां	युष्मत्
तव, ते	युवयोः, वां	युष्माकं, वः
त्वयि	युवयोः	युष्मासु

मकारान्तः पुम्लिङ्गः 'इदं' शब्दः

अयं	इमौ	इमे
इमं, एनं	इमौ, एनौ	इमान्, एनान्
अनेन, एनेन	आभ्यां	एभिः
अस्मै	आभ्यां	एभ्यः
अस्मात्	आभ्यां	एभ्यः
अस्य	अनयोः, एनयोः	एषाम्
अस्मिन्	अनयोः, एनयोः	एषु

मकारान्तः स्त्रीलिङ्गः 'इदं' शब्दः (This)

इयं	इमे	इमाः
इमां, एनां	इमे, एने	इमाः, एनाः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अनया, एनया	आभ्यां	आभिः
अस्यै	आभ्यां	आभ्यः
अस्याः	आभ्यां	आभ्यः
अस्याः	अनयोः, एनयोः	आसां
अस्यां	अनयोः, एनयोः	आसु

मकारान्तः नपुम्सकलिङ्गः 'इदं' शब्दः (This)

इदं	इमे	इमानि
इदं, एनं	इमे, एने	इमानि, एनानि
शेषं	पुम्वत्	

अस् to be

Present	अस्ति	स्तः	सन्ति
	असि	स्थः	स्थ
	अस्मि	स्वः	स्मः
Past	आसीत्	आस्तां	आसन्
	आसीः	आस्तं	आस्त
	आसम्	आस्व	आस्म
Future	भविष्यति	भविष्यतः	भविष्यन्ति
	भविष्यसि	भविष्यथः	भविष्यथ
	भविष्यामि	भविष्यावः	भविष्यामः

स्था तिष्ठ् To stand

Present	तिष्ठति	तिष्ठतः	तिष्ठन्ति
Past	अतिष्ठत्	अतिष्ठतां	अतिष्ठन
Future	स्थास्यति	स्थास्यतः	स्थास्यन्ति

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पा पिब् to drink

Present	पिबति	पिबतः	पिबन्ति
Past	अपिबत्	अपिबतां	अपिबन्
Future	पास्यति	पास्यतः	पास्यन्ति

दृश् पश्य to see

Present	पश्यति	पश्यतः	पश्यन्ति
Past	अपश्यत्	अपश्यतां	अपश्यन्
Future	द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति

कृ to do

Present	करोति	कुरुतः	कुर्वन्ति
	करोषि	कुरुथः	कुरुथ
	करोमि	कुर्वः	कुर्मः
Past	अकरोत्	अकुरुतां	अकुर्वन्
Future	करिष्यति	करिष्यतः	करिष्यन्ति

वस् to live

Present	वसति	वसतः	वसन्ति
Past	अवसत्	अवसतां	अवसन्
Future	वसिष्यति	वसिष्यतः	वसिष्यन्ति

जि जय्

Present	जयति	जयतः	जयन्ति
Past	अजयत्	अजयतां	अजयन्
Future	जेष्यति	जेष्यतः	जेष्यन्ति

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दा यच्छ् to give

Present	यच्छति	यच्छतः	यच्छन्ति
Past	अयच्छत्	अयच्छतां	अयच्छन्
Future	दास्यति	दास्यतः	दास्यन्ति

समासः

१. नीलं + उत्पलं = नीलोत्पलं
२. कठिना + शिला = कठिनशिला
३. रक्ता + मञ्जूषा = रक्तमञ्जूषा
४. बृहती + कथा = बृहत्कथा
५. रामः चन्द्रः इव = रामचन्द्रः
६. नरः सिंहः इव = नरसिंहः
७. चरणं अरविन्दं इव = चरणारविन्दं
८. मुखं चन्द्रः इव = मुखचन्द्रः
९. रघुवंशः इति काव्यं = रघुवंशकाव्यं
१०. मथुरा इति पुरी = मथुरापुरी
११. भारतं इति देशः = भारतदेशः
१२. काशी इति क्षेत्रं = काशीक्षेत्रं
१३. रामश्च लक्ष्मणश्च = रामलक्ष्मणौ
१४. पार्वती च परमेश्वरश्च = पार्वती परमेश्वरौ
१५. प्रगतः आचार्यः = प्राचार्यः
१६. अभिगतः मुखं = अभिमुखः
१७. कुम्भं करोति इति = कुम्भकारः
१८. जलेचरति इति = जलचरः
१९. शत्रुं हन्ति इति = शत्रुघ्नः
२०. गृहे तिष्ठति इति = गृहस्थः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विराम पत्रम्

प्रेषकः एस्. रामः,

सप्तमी / अष्टमी कक्षा 'अ' वर्गः,
श्री विद्यामन्दिर उच्चतर / माध्यमिक / विद्यालयः,
शेलम् – ३.

प्रापकः कक्षा अध्यापिका,

सप्तमी कक्षा / अष्टमी कक्षा 'अ' वर्गः,
श्री. विद्यामन्दिर उच्चतर माध्यमिक विद्यालयः,
शेलम् – ३.

मान्याः,

नमस्ते। अहं अस्वस्थः अस्मि। अहं अद्य विद्यालयं आगन्तुं अशक्तः च अस्मि। अतः कृपया अद्य एकमेव दिनं विरामः दीयतां इति सविनयं प्रार्थये।

धन्यवादः।

स्थानम् – शेलम्
दिनाङ्कः – ३—६—१९९३

इत्थं विनीतः छात्रः
(एस्. रामः)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मित्राय पत्रम्

क्षेमम्

दिनाङ्कः

एम्. कुमारः,
६६. कुमरन् वीथी,
शेलम् – ३.

प्रियमित्र,

अहं अत्र कुशलः अस्मि भवतः। कुशलविषयमपि ज्ञातुमिच्छामि। भवान् परीक्षायां प्रथमस्थाने उत्तीर्णः इति अहं अतीव सन्तुष्टः अस्मि। मम जन्मदिनोत्सवः आगामि सप्ताहे रविवासरे भविष्यति। तदर्थं मम पितरौ विमर्शया प्रचालयितुं निश्चितवन्तौ। अतः रविवासरे भवान् अवश्यं मम गृहं आगच्छतु। मा विस्मरतु। पत्रं च लिखतु।

इत्थं
भवतः प्रियमित्रम्
(एम्. कुमारः)

सविधे

एम्. राजा
३३, राजन् वीथी
राजा नगर,
राजपाळयम् - ३.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

जनकाय पत्रम्

क्षेमम्

दिनाङ्कः

एस्. गणेशः,
छात्रावासः
श्रीविद्यामन्दिर्
शेलम् – ३

प्रिय पितृचरणयोः

प्रणामाः। अहं अत्र कुशलः अस्मि। तत्र भवतः, मातुः भ्रातृ भगिन्योः च कुशल विषयमपि ज्ञातुमिच्छामि। अहं अत्र सम्यक् पठामि। मम वार्षिक परीक्षा च एप्रल् मासस्य प्रथम सप्ताहे प्रचलिष्यति। परीक्षायाः अनन्तरं अहं तत्र आगमिष्यामि। (तदर्थं) यात्राव्ययार्थं कुपया शतं रूप्यकाणि धनादेशद्वारा अवश्यं प्रेषयन्तु इति प्रार्थये। मातुः मम प्रणामाः भ्रातृभगिन्योः च मम स्नेहाभिनन्दनानि च निवेदयन्तु।

इत्थं
प्रिय पुत्रः
(एस्. गणेशः)

सविधे

श्री. एम्. श्रीनिवासन्,
६६ कृष्णन् वीथी,
कृष्णा नगर,
कृष्णगिरि - ३

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Class VIII

General Points

1. What is the meaning of the word Sanskrit? What are the other names of Sanskrit ?
2. What is called literature ?
3. Write your views about Sanskrit literature ?
4. What are the essential features of Sanskrit literature ?
5. What are the two divisions of Sanskrit literature ? How many Vedas are there ? Name them.
6. What is meant by Brahmanas? Name the principle Brahmana texts
7. What does Upanishads embody ?
8. Give the names of important Upanishads.
9. What do the Puranas describe ?
10. Show the difference between Epic and Puranas ?
11. What are the two great epics? Name the authors of them and How many contos or parts they contain?
12. Which is Adhikavya ? Why ? Which is fifth Veda ? Why it is called so ?
13. In which circumstances that Maharshi Valmiki composed Ramayana ? Explain.
14. Write the subject matter of Mahabharata ?
15. What is the essential note of Mahabharata ?

Translate into Sanskrit :

পাঠ I

1. Ramayana is the first poem.
2. The Sage Valmiki is the first poet

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

3. The Sage Narada told Valmiki the story of Rama
4. The Ramayana has seven contos
5. They are Bala kanda, Ayodhya kanda, Aranya kanda Kishkindha kanda Sundara kanda, Yudhdha kanda and Uththara kanda.
6. The Ramayana has 24,000 slokas.

पाठ 2

1. At first the Ramayana was Sung at the ashram of Valmiki
2. At first the Ramayana was Suug by Lava and Kusa.
3. The Ayodhya Kingdom was established by Kushanbha
4. Ajan and Indumathi were the parants of Dasaratha.
5. Vasishta was the teacher of Dasaratha's heridity.
6. Arundhathi is the wife of Vasishta

पाठ 3

1. The King Bageeratha brought the River Ganga to the earth.
2. Lakshmana and Sathrugna are the sons of Sumithra.
3. Bharatha is the son of Kaikeyi.
4. Kausalya is the mother of Sri Rama.
5. Ayodhya is the Capital of Kosala Kingdom.
6. The Sage Viswamithra asked for the help of Rama and Lakshmana to protect the yaga.

पाठ 4

1. Maricha and Subahu are the sons of Thataka
2. Ahalya is the wife of the Sage Gouthama.
3. Renuka Devi and Jamadagni were the parents of Parasurama.
4. Mithila is the Capital of Videha Kingdom.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

5. Sita is the daughter of the King Janaka.
6. Rama married Sita having broken the Shiva Dhanush at Mithlia.

पाठ 5

1. Urmila is the wife of Lakshmana.
2. Mandavi's husband is Bharatha.
3. Sathrugna married Sruthakirthi.
4 Sadananda was the teacher of Janaka's heridity (Kula Guru)
5. Kaikeyi asked Dasaratha to give two boons.
6. The first one is Bharatha wants to become King.
7. The second is Rama has to live in the forest for 14 Years.

पाठ 6

1. Rama met the Sage Bharadhwaja in the forest
2 Rama, Sita and Lakshmana lived at Panchavati in the forest
3. Anusuya was the wife of the Sage Athri
4. Guhan helped Rama to cross the River
5. Bharathan met Rama at Nandhigrama in the forest
6. Sabari was the disciple of the Sage Mathanga
7. Maricha and Subahu helped Ravana to Kidnap Sita

पाठ 7

1. Hanuman met Rama at Rishyamuka Parvatha
2. Sugreeva is the brother of Vali
3. Thara is the wife of Vali
4. Anjana is the mother of Anjaneya.
5. Kumbakarna and Vibhishna are the brothers of Ravana
6. Ravana's wife is Mandodhari
7. Thrijata told Sita about the distruss of Lanka

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पाठ 8

1. Rama sent Anjaneya to found Sita.
2. Rama killed Vali and Crowned Sugreeva
3. Sita was found by Anjaneya at Ashoka Vanam
4. Hanuman fired Lanka by his tail and destroyed
5. Angathan was sent as a messenger to Ravana before the war started

पाठ 9

1. Nilan and Nalan were the Engineers of the Bridge on the ocean.
2. Malyavan was the grand father of Ravana.
3. Veena was the Symbol of Ravana's flag.
4. Rama killed Ravana with Brahmastra.
5. Rama killed Ravana and brought Sita to Ayodhya.

पाठ 10

1. Rama became the king of Ayodhya.
2. Sakethapuram was the other name of Ayodhya.
3. Ayodhya was situated at the bank of River Sarayu
4. Suraya was the Mother of Sita.
5. Urmila was the wife of Lakshmana.

पाठ 11

1. Vyasa wrote Mahabaratha.
2. Mahabharatha is the 5th Vedha.
3. Mahabharatha contains 18 parts.
4. Mahabharatha is one of the two great epics.
5. It contain 1 Lakh Slokas.

पाठ 12

1. From Mahabharatha we may get many Moral Lessons.
2. In it Dharma the Artha, and Kama Shastras are explained.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

3. It has the Baghavath Geetha which teaches us Karma Yoga
4. In this Great work there are various facts about the Indian political economy.
5. Mahabharatha shows Administration of Government and philosophical discussions.

भक्तिश्लोकाः

१. श्रीगणेशपञ्चरत्नम्

मुदा करात्तमोदकं सदा विमुक्तिसाधकं
कलाधरावतंसकं विलासिलोकरक्षकम् ।
अनायकैकनायकं विनाशितेभदैत्यकं
नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १ ॥

नतेतराति भीकरं नवोदितार्कभास्वरं
नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २ ॥

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं
दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३ ॥

अकिञ्चनार्तिमार्जनं चिरन्तनोक्ति भाजनं
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ।
प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं
कपोलदानवारणं भजे पुराणवारणम् ॥ ४ ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं
अचिन्तरूपमन्तहीनमन्तरायकृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनां
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥ ५ ॥

महागणेशपञ्चरत्नमादरेण योऽन्वहं
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगतामदोषतां सुसाहितीं सुपुत्रतां
समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात् ॥ ६ ॥

इति श्रीगणेशपञ्चरत्नस्तोत्रं संपूर्णम् ॥

२. श्रीविष्णोर्द्वादशनामस्तोत्रम्

औषधे चिन्तयेद्विष्णुं भोजने च जनार्दनम् ।
शयने पद्मनाभं च विवाहे च प्रजापतिम् ॥ १ ॥

युद्धेचक्रधरं देवं प्रवासे च त्रिविक्रमम् ।
नारायणं तनुत्यागे श्रीधरं प्रियसंगमे ॥ २ ॥

दुःस्वप्ने स्मर गोविन्दं संकटे मधुसूदनम् ।
कानने नारसिंहं च पावके जलशायिनम् ॥ ३ ॥

जलमध्ये वराहं च पर्वते रघुनन्दनम् ।
गमने वामनं चैव सर्वं कार्येषु माधवम् ॥ ४ ॥

षोडशैतानि नामानि प्रातरुत्थाय यः पठेत् ।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ ५ ॥

इति श्रीविष्णोर्द्वादशनामस्तोत्रं संपूर्णम् ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

३. श्रीमद्भगवद्गीता

ध्यानम्

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेनग्रथितां पुराणमुनिना मध्ये महाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीं
अंब त्वामनुसंदधामि भगवद्गीते भवद्वेषिणीम् ॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥

द्वादशोऽध्यायः

Chapter-12

अर्जुन उवाच —

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥

श्रीभगवानुवाच —

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २ ॥

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥ ३ ॥

संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥ ४ ॥

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥ ५ ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ ६ ॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥ ७ ॥

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥ ८ ॥

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥ ९ ॥

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥ १० ॥

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥ ११ ॥

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥ १२ ॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ १६ ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १७ ॥

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १८ ॥

तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ १९ ॥

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधानामत्परमा भक्तास्तेऽतीव मे प्रियः ॥ २० ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन संवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥

पञ्चदशोऽध्यायः

Chapter-15

श्रीभगवानुवाच —

ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १ ॥

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसंततानि कर्मानुबन्धीनि मनुष्यलोके ॥ २ ॥

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥ ३ ॥

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥ ५ ॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ ६ ॥

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ ८ ॥

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ ९ ॥

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १० ॥

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥ ११ ॥

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १२ ॥

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥

सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥ १५ ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ २० ॥

ओं तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन संवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥

४. लिङ्गाष्टकम्

ब्रह्ममुरारि सुरार्चितलिङ्गं निर्मलभाषित शोभितलिङ्गम् ।
जन्मजदुःख विनाशकलिङ्गं तत्प्रणमामि सदाशिव लिङ्गम् ॥ १ ॥

देवमुनि प्रवरार्चितलिङ्गं कामदहं करुणाकरलिङ्गम् ।
रावणदर्प विनाशनलिङ्गं तत्प्रणमामि सदाशिव लिङ्गम् ॥ २ ॥

सर्वसुगन्ध सुलेपितलिङ्गं बुद्धिविवर्धन कारणलिङ्गम् ।
सिद्धसुरासुर वन्दितलिङ्गं तत्प्रणमामि सदाशिव लिङ्गम् ॥ ३ ॥

कनकमहामणि भूषितलिङ्गं फणिपतिवेष्टित शोभितलिङ्गम् ।
दक्षसुयज्ञ विनाशनलिङ्गं तत्प्रणमामि सदाशिव लिङ्गम् ॥ ४ ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कुङ्कुमचन्दन लेपितलिङ्गं पङ्कजहार सुशोभितलिङ्गम् ।
सञ्चितपाप विनाशनलिङ्गं तत्प्रणमामि सदाशिव लिङ्गम् ॥ ५ ॥

देवगणार्चित सेवितलिङ्गं भावैः भक्तिभिरेव च लिङ्गम् ।
दिनकरकोटि प्रभाकरलिङ्गं तत्प्रणमामि सदाशिव लिङ्गम् । ६ ॥

अष्टदलोपरिवेष्टितलिङ्गं सर्व समुद्भव कारणलिङ्गम्
अष्टदरिद्र विनाशनलिङ्गं तत्प्रणमामि सदाशिव लिङ्गम् ॥ ७ ॥

सुरगुरुसुरवरपूजितलिङ्गं सुरवनपुष्प सदार्चितलिङ्गम्
परात्परं परमात्मकलिङ्गं तत्प्रणमामि सदाशिव लिङ्गम् ॥ ८ ॥

लिङ्गाष्टकमिदं पुण्यं यः पठेत् शिव सन्निधौ
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ९ ॥

॥ इति लिङ्गाष्टकं संपूर्णम् ।

५. श्रीगङ्गास्तोत्रम्

देवि सुरेश्वरी भगवति गङ्गे त्रिभुवनधारिणी तरलतरङ्गे ।
शङ्करमौलि विहारिणी विमले मम मतिरास्तां तव पद कमले । १ ॥

भागीरथी सौकदायिनी मातस्तव जल महिमा निगमे ख्यातः ।
नाहं जाने तव महिमानं पाहि कृपामयी मामज्ञानम् ॥ २ ॥

हरिपदपाद्य तरङ्गिणि गङ्गे हिमविधुमुक्ता धवलतरङ्गे ।
धूरिगुरु मम दुष्कृतभारं गुरु कृपया भवसागर पारम् ॥ ३ ॥

तवजलममलं येन निपीतं परमपदं खलु ते गृहीतम् ।
मातर्गङ्गे त्वयि यो भक्तः किलतं द्रष्टुं नियमः शक्तः ॥ ४ ॥

पतितोद्धारिणि जाह्नवि गङ्गे खण्डित गिरिवर मण्डित भङ्गे ।
भीष्मजननि हे मुनिवरकन्ये पतितनिवारिणि त्रिभुवन तन्ये ॥ ५ ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कल्पलतामिव फलतां लोके प्रणमति यस्त्वां न पतति शोके
पारावार विहारिणि गङ्गे विमुख युवति कृत तरलापाङ्गे ॥ ६ ॥

तव चेन्मातः श्रोतः स्नातः पुनरपि जठरे सोपि न जातः ।
नरक निवारिणि जाह्नवि गङ्गे कलुष विनाशिनि महिमोत्तुङ्गे ॥ ७ ॥

पुनरसदङ्गे पुण्यतरङ्गे जय जय जाह्नवि करुणापाङ्गे ।
इन्द्रमुकुटमणि राजित चरणे सुखदे शुभदे भृत्यशरण्ये ॥ ८ ॥

रोगं शोकं तापं पापं हर मे भगवति कुमतिकलापम्
त्रिभुवन सारे वसुधा हारे त्वमसि गतिर्मम खलु संसारे ॥ ९ ॥

अलकानन्दे परमानन्दे गुरु करुणामयि कातरवन्द्ये ।
तव तटनिकटे यस्य निवासः खलु वैकुण्ठे तस्य निवासः ॥ १० ॥

वरमिह नीरे कमठो मीनः किं वा तीरे सरटः क्षीणः ।
अथवा श्वपचो मलिनो दीनः तव नहि दूरे नृपतिकुलीनः ॥ ११ ॥

भो भुवनेश्वरि पुण्ये धन्ये देवि द्रवमयि मुनिवरकन्ये ।
गङ्गास्तवमिममलं नित्यं पठति नरो यस्सजयति सत्यम् ॥ १२ ॥

येषां हृदये गङ्गा भक्तिः तेषां भवति सदा सुख मुक्तिः ।
मधुरा कान्ता पञ्झटिकाभिः परमानन्द कलित ललिताभिः ॥ १३ ॥

गङ्गास्तोत्रमिदं भवसारं वाञ्छित फलदं विमलं सारम् ।
शङ्करसेवक शङ्कर रचितं पठति सुखीस्तव इति च समाप्तः ॥ १४ ॥

॥ इति श्रीगङ्गास्तोत्रं संपूर्णम् ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

६. शारदाभुजङ्गस्तोत्रम्

स्ववक्षोजकुम्भां सुधापूर्णकुम्भां प्रसादावलम्भां प्रपुण्यावलम्बाम् ।
सदास्येन्दुबिम्बां सदानोष्ठबिम्बां भजे शारदाम्बामजस्रं मदम्बाम् ॥ १ ॥

कटाक्षे दयार्द्रां करे ज्ञानमुद्रां कलाभिर्विनिद्रां कलाभैस्सुभद्राम् ।
पुरस्त्रीं विनिद्रां पुरस्तुङ्गभद्रां भजे शारदाम्बामजस्रं मदम्बाम् ॥ २ ॥

ललामाङ्कबालां लसत्गानलोलां स्वभक्तैकबालां यशः श्रीकबोलाम् ।
करेद्वक्षमालां कनत्प्रत्नलोलां भजे शारदाम्बामजस्रं मदम्बाम् ॥ ३ ॥

सुसीमन्दवेणीं दृशानिर्जितैणीं रमत्कीरवाणीं नमत्वज्रपाणीम् ।
सुधामन्तरास्यां मुदाचिन्त्यवेणीं भजे शारदाम्बामजस्रं मदम्बाम् ॥ ४ ॥

सुशान्तां सुदेहां दृगन्ते कशान्तां लसत्सल्लताङ्गीमनन्तामचिन्त्याम् ।
स्मरेत्तापसैः सङ्गपूर्वस्थितां तां भजे शारदाम्बामजस्रं मदम्बाम् । ५ ॥

कुरङ्गे तुरङ्गे मृगेन्द्रे खगेन्द्रे मराले मदेभे महोक्षेदिरूढाम् ।
महत्यां नवम्यां सदा सामरूपां भजे शारदाम्बामजस्रं मदम्बाम् ॥ ६ ॥

ज्वलत्कान्तिवह्निं जगन्मोहनाङ्गीं भजे मानसाम्भोजसुप्रान्तभृङ्गीम् ।
निजस्तोत्र सङ्गीत नृत्यप्रभाङ्गीं भजे शारदाम्बामजस्रं मदम्बाम् ॥ ७ ॥

भवाम्बोज नेत्राब्ज संपूज्यमानां लसन्मन्दहास प्रभावक्त्रचिन्हाम् ।
चलच्छञ्चला चारुताटङ्ककर्णां भजे शारदाम्बामजस्रं मदम्बाम् ॥ ८ ॥

॥ इति शारदा भुजङ्गस्तोत्रं संपूर्णम् ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

७. श्रीकृष्णाष्टकम्

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ १ ॥

अतसी पुष्प सङ्काशं हार नूपुर शोभितम् ।
रत्न कङ्कण केयूरं कृष्णं वन्दे जगद्गुरुम् ॥ २ ॥

कुटिलालक संयुक्तं पूर्णचन्द्र निभाननम् ।
विलसत् कुण्डलतरं कृष्णं वन्दे जगद्गुरुम् ॥ ३ ॥

मन्दारगन्ध संयुक्तं चारुहासं चतुर्भुजम् ।
बर्हिपिञ्छाव चूडाङ्गं कृष्णं वन्दे जगद्गुरुम् ॥ ४ ॥

उत्फुल्ल पद्म मद्राक्षं नीलजीमूत सन्निभम् ।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥ ५ ॥

रुक्मिणी केलिसंयुक्तं पीताम्बर सुशोभितम् ।
अवाप्त तुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् ॥ ६ ॥

गोपिकानां कुचद्वन्द्व कुङ्कुमाङ्कित वक्षसम् ।
श्रीनिकेतं महेश्वासं कृष्णं वन्दे जगद्गुरुम् ॥ ७ ॥

श्रीवत्साङ्कं महोरस्कं वनमाला विराजितम् ।
शङ्खचक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् ॥ ८ ॥

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटि जन्म कृतं पापं सद्य एव विनश्यति ॥ ९ ॥

॥ इति श्रीकृष्णाष्टकं संपूर्णम् ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

८. बिल्वाष्टकम्

त्रिदळं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम् ।
त्रिजन्म पाप संहारमेकं बिल्वं शिवार्पणम् ॥ १ ॥

त्रिशाखैर्बिल्वपत्रैश्च ऐच्छिक्कैः कोमळै शुभैः ।
शिवपूजां करिष्यामि ह्येकबिल्वं शिवार्पणम् ॥ २ ॥

अखण्डबिल्वपत्रेण पूजिते नन्दिकेश्वरे ।
शुद्ध्यन्ति सर्वपापेभ्यो ह्येकबिल्वं शिवार्पणम् ॥ ३ ॥

सालिग्राम शिलामेकां विप्राणां जातु अर्पयेत् ।
सोमवारे महापुण्यमेकबिल्वं शिवार्पणम् ॥ ४ ॥

दन्तिकोटि सहस्राणि वाजपेय शतानि च ।
कोटिकन्यामहादानमेकबिल्वं शिवार्पणम् ॥ ५ ॥

लक्ष्म्याः स्तनतमुत्पन्नं महादेवस्य च प्रियम् ।
बिल्ववृक्षं प्रयच्छामि ह्येकबिल्वं शिवार्पणम् ॥ ६ ॥

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् ।
अघोरपाप संहारमेकबिल्वं शिवार्पणम् ॥ ७ ॥

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय ह्येकबिल्वं शिवार्पणम् ॥ ८ ॥

बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
सर्वपापविनिर्मुक्तः शिवलोकमवाप्नुयात् ॥ ९ ॥

इति बिल्वाष्टकं संपूर्णम् ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

९. श्रीरामचन्द्राष्टकम्

सुग्रीवमित्रं परमं पवित्रं सीता कलत्रं नवमेघ गात्रम् ।
कारुण्यपात्रं शतपत्रनेत्रं श्रीरामचन्द्रं सततं नमामि ॥ १ ॥

संसारसारं निगमप्रचारं धर्मावतारं हृतभूमिभारम् ।
सदा निर्विकारं सुखसिन्धुसारं श्रीरामचन्द्रं सततं नमामि ॥ २ ॥

लक्ष्मीविलासं जगतो निवासं भूदेववासं शरदिन्दुभासम् ।
लङ्काविनाशं भुवनप्रकाशं श्रीरामचन्द्रं सततं नमामि ॥ ३ ॥

मन्दारमालं वचने रसालं गुणैर्विशालं हतसप्त सालम् ।
क्रव्यादकालं सुरलोकपालं श्रीरामचन्द्रं सततं नमामि ॥ ४ ॥

वेदान्तज्ञानं सकले समानं हृदारिमानं धृत सप्रदानम् ।
गजेन्द्रयानं विकलावसानं श्रीरामचन्द्रं सततं नमामि ॥ ५ ॥

श्यामाभिरामं नयनाभिरामं गुणाभिरामं वचसाभिरामम् ।
विश्वप्रणामं कृतभक्तकामं श्रीरामचन्द्रं सततं नमामि ॥ ६ ॥

लीलाशरीरं रणरङ्गधीरं विश्वैकवीरं रघुवंशहारम् ।
गम्भीरनादं जितसर्ववादं श्रीरामचन्द्रं सततं नमामि ॥ ७ ॥

कलेति भीतं सुजने विनीतं सामोपगीतं स्वकुलेप्रदीतम् ।
तारापगीतं वचनाब्धधीतं श्रीरामचन्द्रं सततं नमामि ॥ ८ ॥

ब्रह्मादिदेवसेव्याय ब्रह्मण्याय महात्मने ।
जानकी प्राणनाथाय रघुनाथाय मङ्गळम् ॥ ९ ॥

॥ श्रीरामचन्द्राष्टकं संपूर्णम् ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,



Get up early & do some physical exercises



Avoid Smoking & Alcoholic Beverages.

Keep your room clean of dust & mites.

Follow a regular

Avoid Tension & Worry

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sri Ramapuram, Chennai